No. १२७२

Title अनुमिति परामर्श हेतुता-विचार:

Author हरिराम तर्कवागीश भट्टाचार्य:

Extent ३२ Age ×

Subject न्याय शास्त्रम्

अनुमितिपरामर्शहेतुताविचारः

१२७२

32

[redacted]

अनुमितिपरामर्शहेतुताविचारः

अनुमिति० श्रीसिद्धेश्वर्यै नमः ।। अनुमितिपरामर्शयोः सामान्यतो [redacted] नुमितित्वपरामर्शत्वाभ्यां कार्यकारण
भावः । परामर्शत्वं च जातिविशेषः । ननु व्याप्तिविशिष्टपक्षधर्मतानिश्चयत्वं । अतो व्याप्त्या
देः साध्यादिभेदेन अननुगमे पि न क्षतिः । न च तादृशजातौ मानाभावः । अनुमितित्व
पकार्यजनकतावच्छेदकतयैव तत्सिद्धेः ।। न च तादृशजातेः चाक्षुषत्वादिना सांकर्यमिति
वाच्यं । मानसपरामर्श एव तादृशजातिस्वीकारेण चाक्षुषत्वादिना सामानाधिकर
ण्यविरहेण सांकर्याभावात् । एवं सति चाक्षुषादिव्याप्यवत्तानिश्चयदशायां फलापलापइति
रुनाशंकनीया । तादृशव्याप्यवत्ताज्ञानानंतरं तन्मूलकोपनीतभानात्मकमानसपरामर्शो
त्पत्त्यैव अनुमितिसंभवात् । न च पक्षादिचक्षुःसंनिकर्षसत्वे पक्षादि [redacted] चा चाक्षुषोत्तरं
क्षुषपरामर्शस्यैवोत्पादान्मानसेनैव परामर्शसंभवः । मानसादिसामग्र्याः चाक्षुषा
दिसामग्र्यपेक्षया दुर्बलत्वादिति वाच्यं । चक्षुःसंयोगादिसत्वेपि चक्षुर्मनोयोगादिवि
प२ गमे न चाक्षुषो [redacted] संभवेन मानससंभवात् । फलानुरोधेन तथैव कल्पनात् । चाक्षुषा
द्यनुत्पादस्यतत्रोभयवादिसिद्धतया चक्षुर्मनोयोगादिवि [redacted] गम [redacted] कल्पने बाध्य

फक्ता

कामावात्। न चैवमपि एकक्षणे विलापः। अनन्यगत्या तथा स्वीकारात्। अथ परामर्शत्वजातेर्मानसत्व
त्व व्याप्यत्वं स्मृतिर्व्याप्यत्वं वे [redacted] ति विनिगमनाविरहः। स्मृतित्वव्याप्यत्वे पि चाक्षुषपराम
र्शोत्तरं तन्मूलकस्मरणात्मकपरामर्शकल्पने पाक्षिकविलंबेनानुमित्युत्पादसंभवात्। न च स्म
रणकल्पने उद्बोधककल्पनाधिक्यमिति वाच्यं। तदव्यवहितपूर्ववर्त्यात्ममनोयोगादिव्यक्तेरे
व उद्बोधकत्वस्वीकारेणातिरिक्तकल्पनानवकाशात् न च धर्मिण उभयवादिसिद्धत्वे पि
उद्बोधकविधया तस्य हेतुत्वकल्पनाधिक्यं दुष्परिहरमेवेति वाच्यं। तदानीं मानसकल्पने
पि तादृशमानसव्यक्तीनां समयांतरे सामान्यसामग्रीबलादुत्पादकारणापत्तेः तदव्यवहितपूर्व
वर्त्यात्ममनोयोगादिव्यक्तीनां हेतुताकल्पनस्यावश्यकतया साम्यादिति चेन्न। स्मृतित्वव्याप्य
त्वमते चाक्षुषादिपरामर्शस्थले द्वितीयक्षणोत्पन्नसंस्कारात् तृतीयक्षणे स्मरणात्मकपरा
मर्शसंभवात् चतुर्थक्षणे अनुमितिर्भविष्यति मानसत्वव्याप्यत्वमते तु तृतीयक्षणे एवानु
मितिर्भविष्यतीति क्षणविलंबाधिक्यस्यैव विनिगमकत्वात्। वस्तुतस्तु स्मृतित्वव्याप्यत्वम
ते स्मरणात्मकपरामर्शकल्पनक्षणे मानसोत्पत्तौ बाधकाभावः। उपनायकज्ञानचटिका

॥अ.पा
॥२॥

यास्तत्सामग्र्या अपि तत्त्वात् । अतो मानसं प्रति तत्तत्स्मरणव्यक्तिसामग्र्याः प्रतिबंधकतात्वप
दाव्याप्यस्मरणं तत्प्रतिबंधकमावकल्पने गौरवमित्येवविनिगमकमिति । एतेन स्मृतित्वव्याप्य
त्वेन यो विरोधकारणतायां निश्चयत्वानिवेशो न लाघवमवगति । संशयात्मकस्मरणस्य
सिध्या निश्चयत्वनिवेशनव्याकल्पमाकात् । न चैवमानसत्वव्याप्यत्वे चिपरामर्शत्वे
जाते संशयात्मकं व्याप्यवत्तामानसे अनभ्युपगमात् । निश्चयत्वनिवेशो नास्तीति
वाच्यं । वह्निव्याप्यत्वांशे संशयात्मकपर्वतादिव्याप्यवत्त्वांशे निश्चयात्मकसमूहालंबनमा
नसोत्तरं पर्वतानुमितिर्न स्यात् । अतः संशयात्मकपरामर्शे परामर्शत्वजातिस्वीकारआ
वश्यकः । अतस्तदुत्तरं वह्न्याद्यनुमितिवारणाय तन्मते निश्चयत्वनिवेशस्यावश्यकत्वा
दतः स्मृतित्वव्याप्यत्वमेव परामर्शत्वमिति परास्तं । निश्चयत्वनिवेशावश्यया [redacted]
सामग्र्यां प्रतिबंधकत्वकल्पनापेक्षयैव गौरवात् । वस्तुतस्तु मानसत्वव्याप्यत्वम
तेपि निश्चयत्वनिवेशो नास्ति उक्तसमूहालंबनानंतरं स्मृतित्वव्याप्यत्वेवादिनद्व

वह्नि

भावप

तन्मतेपिघटानुमित्यनभ्युपगमेन तत्त्वपरामर्शत्वजातेरनभ्युपगमेन तन्निश्चयत्वानिवेशेपि स
त्यभावात्। यदि च स्मृतित्वव्याप्यत्ववादिमते तादृशसमूहालंबनात्मकमानसानंतरं स्मर
णात्मकघटादिव्याप्यवत्तापरामर्शकव्यक्तित्वावच्छिन्नानुमितिरुत्पद्यते तदा मन्मतेपि तदुत्तरं
वह्निव्याप्यधूमविषयकघटादिव्याप्यवत्ताकात्मिमानसकव्यक्तित्वोऽनुमितिरूपपादनी
याऽउपनायकवत्ताकज्ञानसत्वात्तत्र वह्निव्याप्यत्वस्याभानेबाधकाऽदिति चेन्न। मन्मतेपित
दानीं वह्निव्याप्यवत्त्वविषयकमानसोत्पत्तौ बाधकाभावः। स्मरणांतरकृत्युत्पत्तिबंधके
ताकस्मृतिसामग्र्यास्तत्राभावात्। अतिरिक्तप्रतिबध्यप्रतिबंधकभावकल्पनयोपपत्ति
श्चोभयमतेऽपि तुल्येति तस्मान्मानसत्वव्याप्यत्वमेव परामर्शत्वमिति केचित्। अत्रेदं चिं
त्नीयं। घटादिव्याप्यवत्तापरामर्शात् वह्न्याद्यनुमित्यापत्तिवारणाय वह्न्याद्यनुमितौ
वह्न्यादिव्याप्यवत्तापराम[illegible]र्शणां विशिष्य हेतुताया आवश्यकत्वात् तादृशकार्यकारण
भावेमानाभावः। न च कारणसत्वे कार्यतावच्छेदकावच्छिन्नोत्पत्तिनियमस्तथा चाऽनुमिति
त्वावच्छिन्नोपादनेष्टापत्तिः। वह्न्यनुमितित्वावच्छिन्नोपादनेऽआपादकाभावइति वा
च्यं।

घटवीच कालेऽनुमितित्वावच्छिन्नापत्तेर्विशेषकार्यभावस्य आवश्यकत्वमिति वाच्यं। तादृश
नियमे मानाभावात्। भावे वा ज्ञानत्वेनानुमितित्वेनैव सामान्यकार्यकारणभावोस्तु
3 किं परामर्शत्वजातिकल्पनया। एतेन विशेषकार्यकारणभावेऽवश्यमाराध्ये तस्याकारणवैशि
ष्ट्यनिवेशापेक्षया तत्र अनुमितित्वनिवेशो नास्ति तदनिवेशेपि व्यभिचाराभावात्। एवं च का
र्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वादिनियमानुरोधात् अनुमितित्वावच्छिन्नं प्रतिपरा
मर्शत्वेन सामान्यहेतुत्वकल्पनमावश्यकं। न चैतादृशनियमानुरोधेन क्लृप्तविशेषका
र्यतायामेवानुमितित्वस्यावच्छेदकत्वमस्तु किमतिरिक्तकार्यकारणभावेनेति वाच्यं। वि
शेषकार्यतायामनुमितित्वावच्छेदकत्वोपगमे ऽनंतस्य लेऽवच्छेदकगौरवापातात्। अत
स्तद्वैलक्षण्याऽतिरिक्तकार्यकारणभावकल्पनापाटवोचितत्वादित्यपि निरस्तं। ज्ञानत्वेन
हेतुत्वेपि तादृशनियमोपपत्तौ परामर्शत्वजातेस्तथाप्यसिद्धेः। न च ज्ञानत्वेन कारणत्व
कल्पने घटज्ञानादप्यनुमित्यापत्तिरिति वाच्यं। विशेषसामग्रीसहितायाएव सामान्यसा
मग्र्याः कार्यजनकत्वनियमात्। वह्निव्याप्यवतो निर्धूमपादित्यविशेषसामग्रीविरहेणाप

ना१

त्यभावात् । परामर्शत्वजातसपक्षस्याज्ञानत्वस्य व्यापकधर्मत्वेऽन्यथासिद्धिनिरूपकत्वात्तस्य परा-
मर्शत्वस्य चाक्लृप्तत्वात् कथं तेन रूपेण हेतुतेति नाशंकनीयं । क्लृप्ताऽगुरुव्याप्यधर्मान्तरसमनि-
यतव्यापकधर्मस्यान्यथासिद्धिनिरूपकत्वात् । न च ज्ञानत्वेन हेतुत्वे संयोगत्वादिना हे-
तुताभावादायविनिगमनाविरहः । परामर्शत्वेन तद्धेतुत्वे परामर्शत्वस्य कारणतावच्छेदक-
तयैव सिद्धेस्तदवच्छेदकतायाः धर्मिग्राहकमानसिद्धत्वान्न विनिगमनाविरहाव-
काश इति वाच्यं । एवमप्यनुमितिजनकतावच्छेदकतया जातिविशेषः परामर्शसंयोगादे-
र्वा कल्प्यतेत्यत्र विनिगमनाविरहस्य प्रमाणेऽपि दुर्वारत्वात् । अथ विशेषकारणतावच्छेदक-
तयैव परामर्शत्वजातिसिद्धिः । तस्याश्च व्याप्त्वेऽक्ते पुरस्त्यानिश्चयत्वाभिव्यंशेन लाघवात् ।
एवं च सिद्धायामेतादृशजातौ तयैव सामान्यहेतुत्वमपि । व्यापकधर्मेण तया तदानीं ज्ञा-
नत्वस्यान्यथासिद्धिनिरूपकत्वादिति चेत् । एवं सति शाब्दबोधादिजनकतावच्छेदक-
तया आकांक्षातात्पर्यनिर्णयादिनिष्ठाः जातिविशेषाः सिध्यन्तु एवं च तैः सममाकांक्षा-
दिविषयकसमूहालंबने परामर्शत्वस्य संकरप्रसंगः । न चैवं यदि तादृशसमूहालंबना-
तरं नानुमितिश्चेत्कुतः उपपत्स्यते [illegible] ने शाब्दबोधजनकतावच्छेदिका

जातिर्न स्वीक्रियते । यदि च शाब्दबोधे उपस्थाप्यते तदा अनुमितेरनुरोधात् परामर्शत्वं तत्र न स्वीक्रि-
यते इति न संकरप्रसंग इति वाच्यं । यत्र तादृशसमूहालंबनेनानुमितिशाब्दबोधौ क्रमेण
स्यातां तत्रैवोभयसमावेशेन संकरप्रसंगात् । अथ यादृशसमूहालंबनेन प्रथमं यादृश
ज्ञानं जन्यते तत्र तादृशज्ञानजनकतावच्छेदिका जातिरवोपेयते । ननु तदुत्तरं द्वितीयज्ञानं ते-
न जन्यते अपि तु तदुत्तरोत्पन्नभाविज्ञानांतरेणैवेति नोभयजात्योः समावेश इति चेत् । मा-
स्तु संकरप्रसंगस्तथापि तादृशजातिः प्रमाणाभावेनैव परामर्शहेतुतापि निश्चित्वनिवेशस्य
व्यवस्थापनीयतया लाघवानवकाशात् । तथा हि वह्निव्याप्यवान्पर्वतो घटव्याप्यवा-
निति तादृशसंशयानंतरं घटानुमितिनिर्वाहाय तत्र परामर्शत्वजातिस्वीकार आवश्यकः ।
न च तादृशज्ञानानंतरं घटानुमितिर्जायत एव परं तु तदुत्तरभाविज्ञानांतरादित्युक्तमेवेति वाच्यं ।
तादृशज्ञाने पि वह्निव्याप्यतदभावकोटिकत्वेन संशयत्वेन तत्र परामर्शत्वजातिस्वीकारे तदुत्तरमेव व-
ह्न्यनुमित्यापत्तेः । अतिरिक्तप्रतिबंधकताभावं कल्पयित्वा तादृशज्ञानस्य वह्निव्या-
प्यत्वाद्यविषयकत्वोपपादकनिष्ठप्रकारतानिरूपकविशेष्यत्वेन हेतुत्वकल्पनस्यैवो-

विशेष

च

तत्वात् तस्मात्ने सामान्यकार्यकारणाभावः॥ अत्र वदंति॥ अनुमितित्वावच्छिन्नं प्रतिपरामर्शत्वेन सा
मान्यहेतुतानभ्युपगमे परामर्शसामान्यजन्यकालीनानुमितित्वावच्छिन्नाभावे अनंतसामग्रीवि
रहकूटस्य प्रयोजकत्वाभ्युपगमेन गौरवात्॥ अस्माकं तु तत्रैकस्य परामर्शत्वावच्छिन्नाभावस्यप्र
योजकतयैवोपपत्तेः॥ तादृशलाघवस्य कारणतायामनुपष्टंभकत्वे तत्तद्व्यक्तिस्थानीयविशेषसामग्रीनां
तत्रैवोपपत्तौ सर्वत्र सामान्यधर्मावच्छिन्नकारणताविलोपप्रसंगात्॥ न परामर्शसामान्यजन्यकाली
नानुमित्यभावः॥ सिद्धिविशेषसमवहितपरामर्शसामान्यकालीनानुमितिसामान्याभावादनतिरि
क्तस्य तत्र तद्विषयकानुमितिविशेषसामग्रीविरहाणां प्रयोजकत्वमावश्यकमेव तत्र परामर्शत्वा
अनुमि भावासत्वात्॥ नहि सिद्धिकालीनपरामर्शो मितिसामान्यजनकतावच्छेदकजातिरेव न स्वीक्रियते
इति संभवति॥ स्वजन्यानुमित्यात्मकसिद्धिसमवहितपरामर्शे तदनभ्युपगमे प्राथमिकानुमितेरेव
अनुपपत्तेरिति वाच्यं॥ उक्तस्थलानुरोधेन सिध्यभावादिरूपविशेषकारणाभावानां प्रयोजक
पाउपभपाबादिसिद्धावपि परामर्शविशेषाभावानामनुमितिसामान्याभावप्रयोजकत्वाक
ल्पनेव लाघवसंभवात्॥ तत्तत् अनुमित्यादिरूपसामान्यकार्याभावस्याकिंचित्काला
वच्छेदेन सर्वत्रैवसत्वात्॥ तन्न सामग्र्यभावजनिष्पन्नः॥ किंतु तत्तत्कालावच्छिन्नतत्तदधिक

निरूपित

।।अ॰प॰।। रणत्वमेव तन्न द्व्यवहितपूर्वकालावच्छिन्नसामग्रीविरहवत्त्वान्नियमात् तत्रैव सामग्र्यभाववत्तायाः
।।५।। प्रयोजकत्वं ।। तन्मात्रावच्छेदकभेदाद्भिन्नमेवेति परामर्शसामान्यविरहानंतरक्षणावच्छिन्नानुमित्य
5 भावाधिकरणत्वे विशेषसामग्रीविरहकूटस्य प्रयोजकत्वं नोभयासिद्धमिति सा परामर्शसामा
न्याभावस्य प्रयोजकत्वस्य लाघवमपक्षपातमेवेति । पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगा
दिसंबंधावच्छिन्नवह्नित्वाद्यवच्छिन्नविधेयताकानुमितौ पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसं संयोग
घ बंधघटितवह्नित्वावच्छिन्नव्याप्तिविशिष्टधूमत्वाद्यवच्छिन्नप्रकारताशालिनिश्चयत्वेन विशिष्य
हेतुताबोध्या ।। द्रव्यं वह्निव्याप्यधूमवदित्याकारकपरामर्शात्पर्वतो वह्निमानित्येतादृशानुमितेर
नुदयात् । पर्वतत्वावच्छिन्नविशेष्यतापानिवेशः ।। जातित्वादिना पर्वतत्वादिधर्मितावच्छेदकक
परामर्शात्स्वरूपतः पर्वतत्वादिधर्मितावच्छेदककानुमितेरप्यनुदयात् तादृशानुमितिजन
कतायां विशेष्यतायां पर्वतत्वादिनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकत्वं पर्वतत्वाद्यवच्छि
न्नत्वं निवेशनीयं ।। जातिमान् वह्निमानित्याकारकजातित्वाद्यवच्छिन्नविशेष्यताकानुमितौ च
तादृशपरामर्शस्य कारणत्वांतरं बोध्यं ।। पर्वतत्वात्पर्वतधर्मिकानुमितिजनकतावच्छेदकीभूतवि

।।राम।।
।।५।।

विशेष्यतायां तत्तत्पर्वतवृत्तित्वमपि निवेशनीयं । एकपर्वतविशेष्यकपरामर्शात्तु अन्य
पर्वतधर्मिकानुमित्यनुदयात् इत्थं च पर्वतत्वादिरूपविशेष्यतावच्छेदकभेदे नै
व विशेष्यभेदेनापि कार्यकारणभाव[redacted]भेदो ऽगत्याभ्युपेयः । मीमांसकानुमापि
कृ नस्तु समानप्रकारत्वे नैव कार्यकारणभावो न तु समाने विशेष्यत्वमपि तंत्रापि कृ
र्वतत्वादिरूपेणैकधर्मिविषयकपरामर्शात्तेन रूपेणान्यपर्वतरविशेष्यका
नुमित्युपगमेक्षतिकिरहाता । यदि च धर्मिणमनिवेश्य पर्वतत्वादिकं निवेश्य का
र्यकारणभावः स्वीक्रियते तदा पर्वतत्वादिनापर्वतादिमात्रविषयकपरामर्शज
न्यानुमितौ तेन रूपेणाज्ञगतत्वमानापत्तिः । एतच्चानुभवविरुद्धमिति यदा म
न्यसे तदा पर्वतत्वावच्छिन्नविशेष्यतायां सामान्यतः पर्वतादिवृत्तित्वं निवेश्यं ।
न तु तत्तत्पर्वतादिवृत्तित्वं पर्वतत्वादिनाक्रदाव्यवगाहिन्यामनुमितौ च तादृ
शपरामर्शस्य कारणत्वांतरकल्पनायामवतो व्यावश्यकत्वादित्याहुः ॥ व

॥अ॰प॰र॰॥
॥५॥

हि व्याप्यधूमवत्पर्वतवान् यद्देश इति ज्ञानादनुमित्यनुदयेऽप्युरस्यविशेष्यत्वमपि तत्र निवे
शनीयात् तत्प्रकारतान्यत्वं। उपदर्शितस्थले च वह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यता
या एव देशादिनिष्ठविशेष्यतानिरूपितप्रकारतात्मकत्वेन तादृशज्ञानादनुमित्यापत्तिः
व्याप्तिविषयकत्वानादनुमित्यापत्तिवारणाय व्याप्तिविशिष्टधूमत्वावच्छिन्नस्य प्रका
रतायां निवेशः। तदर्थश्च व्याप्यत्वावच्छिन्नविशेष्यत्वे सति धूमत्वावच्छिन्नत्वं धूमत्वा
द्यवच्छिन्नत्वादिनिवेशनप्रयोजनं स्फुटीभविष्यत्येव यत्र व्याप्तिशरीरे साध्यस्य एकस
म्बन्धः प्रविष्टः तत्राप्यपरसंबंधेन साध्यानुमितिवारणाय तत्संसर्गस्यानुमितिजनकताव
च्छेदककोटौ निवेशनीयः। तत्र व्यापकरूपव्याप्तौ साध्यतावच्छेदकसंबंधस्य घटकत्व
मुभयथा। साध्यतावच्छेदकसंबंधेन सामानाधिकरण्येन साध्याधिकरणे हेतुताव
च्छेदकसंबंधेन वृत्तित्वरूपस्य साध्यसामानाधिकरण्यस्य साध्यतावच्छेदकसंबंधाव
च्छिन्नाभावप्रतियोगितावच्छेदकत्वस्य च निवेशात्। साध्याभाववद्वृत्तित्वरूपव्या
प्तौ साध्याभावपदस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभा

वपरतया सकृन्निवेश इति ध्येयं। धूमत्वाद्यवच्छिन्ननिरूपितव्याप्तिज्ञानात् वह्नित्वावच्छिन्नविधेयकानु-
मित्यनुदयात् तादृशानुमितिजनकतायां वह्नित्वाद्यवच्छिन्ननिरूपितव्याप्तिनिवेशः। वह्नित्वावच्छिन्न-
निरूपिता च व्याप्तिर्द्विविधा हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसाम-
नाधिकरण्यरूपा। वह्नित्वाद्यवच्छिन्नाभाववदवृत्तित्वरूपा चेत्यन्याप्ता। अथ व्यापकसामानाधिकरण्य-
त्वादिना वस्त्वन्तरमवगाहमानात् धूमव्यापकवह्निसमानाधिकरणधूमवान् पर्वत इति परामर्शा-
द्वह्न्यभाववदवृत्तित्वाभावत्वादिना च तदभावत्वादिकमवगाहमानात् वह्न्यभाववदवृत्तिधूमवान्
पर्वत इत्यादिपरामर्शाच्च अनुमित्यनुदयप्रसंगः। तादृशभ्रमात्मकपरामर्शस्य वास्तवव्याप्त्यनवगा-
हितया उक्तकारणतावच्छेदकानाक्रान्तत्वात्। एवं च व्यापकसामानाधिकरण्यरूपायां व्याप्तौ केव-
लसामानाधिकरण्यत्वादिना वह्न्यभाववदवृत्तित्वादिरूपव्याप्तौ केवलाभावत्वादिना भानेऽपि ततोऽप्यनुमि-
त्यापत्तिः। तादृशज्ञानस्यापि वास्तववह्निव्याप्यत्वावच्छिन्नधूमादिप्रकारताशालित्वादिति चेन्न। न हि
वास्तवव्याप्यत्वावच्छिन्नत्वं हेतुप्रकारतायां वस्तुगत्या निवेश्य येनोक्तदोषः स्यात्। किन्तु व्यापक-
सामानाधिकरण्यावगाहिपरामर्शहेतुतायां हेतुतावच्छेदकावच्छिन्नो यः हेतुनिष्ठावच्छेदकता-
तान्निरूपकीभूततायाः अधिकरणनिष्ठावच्छेदकतातन्निरूपकीभूततायाः आधेयत्वावच्छिन्नाव-

च्छेदकतातन्निरूपकीभूतताया भावत्वावच्छिन्नावच्छेदकतातन्निरूपकीभूतताया प्रतियोगित्वनिष्ठाव
च्छेदकतातन्निरूपकी[redacted] भूततायाऽवच्छेदकत्वनिष्ठावच्छेदकतातन्निरूपकीभूतताया भावत्वा
वच्छिन्नोवच्छेदकता तन्निरूपकवह्नित्वावच्छिन्नावच्छेदकतातन्निरूपकसाध्यनिष्ठावच्छेदकत
तन्निरूपकाधिकरणनिष्ठावच्छेदकतानिरूपकवृत्तित्वत्वावच्छेदकतानिरूपकत्वमेव हेतुता
वच्छेदकावच्छिन्नप्रकारतायां निवेशनीयं हेतुनिष्ठत्वस्य साध्यनिष्ठत्वयोश्च हेतुतावच्छेदकसाध्य
तावच्छेदकसंबंधावच्छिन्नत्वस्य तादृशावच्छेदकतायां [redacted] भाय न तु तस्यापि निवेशः। धूमत्वेन वह्नि का ६
वह्नित्वादिना घटादिविषयकज्ञानादनुमित्युत्पत्तेः। प्रयोजनाभावाच्च। नीलधूमव्यापकवह्निसमा
नाधिकरणधूमवानित्यादिज्ञानवारणाय धूमनिष्ठावच्छेदकता धूमत्वान्यधर्मानवच्छि
न्नत्वेन विशेषणीया। तेनेदं ज्ञानेव्यापकवह्निसमानाधिकरणे [redacted] वानित्यादावखंडस्या धनप
प्यरङसिद्धावपि न [redacted] सति। स्वंडशः प्रसिद्धानां व्याप्तिघटकपदार्थानां यथोक्तक्रमेण निवि
ष्टानां साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानहेतुतायामपि साध्यतावच्छेदकावच्छिन्ननिष्ठाव
च्छेदकतानिरूपकप्रभावत्वावच्छिन्नावच्छेदकतानिरूपकवैयधिकरण्यनिष्ठावच्छेदकतानि
रूपकाधेयत्वावच्छिन्नावच्छेदकतानिरूपकप्रभावत्वावच्छिन्नावच्छेदकत्वमेव हेतुप्रका

6

का २

तायां निवेशनीयं। व्याप्तिघटकीभूतपदार्थानां विशिष्यवक्तोपस्थितिवशात् विशेष्ये विशेषण
मितिरीत्या व्याप्त्यादिकमवगाहमानात् परामर्शात् अनुमित्युदये तु व्याप्तिप्रकारतानिरूपि
तत्वमेव हेतुप्रकारतायां निवेश्यं न तु तदवच्छिन्नत्वमपि। व्याप्तिविशिष्टवैशिष्ट्यबोधी
यप्रकारतायाएव व्याप्यत्वावच्छिन्नत्वात्। अत्रापि वा त्वव्याप्तिप्रकारतायां न निवेशः। अपि
तु हेतुतावच्छेदकप्रकारतानिरूपितायां हेतुनिष्ठप्रकारता तन्निरूपितायां अधिकरणनिष्ठप्र
कारतादृश्येवंरीत्यैव व्याप्तिघटकप्रकारतास्तोमस्य निवेशः। अतो न पूर्वोक्तानुपपत्तिः। नन्वे
प्रकारताविशेष्यतयोरेव निरूप्यनिरूपकभावात् हेत्वादिप्रकारतायाः कथं हेतुतावच्छे
दकादिनिष्ठप्रकारतानिरूपितत्वमिति वाच्यं। अधिकरणादिनिष्ठविशेष्यतानिरूपित
प्रकारतायाएव हेतुतावच्छेदकादिप्रकारतानिरूपितविशेष्यात्मकत्वेन अनुपपत्त्यभावात्
वस्तुतस्तु विशेष्ये विशेषणमितिरीत्या यत्र परामर्शस्तत्रापि द्वितीयक्षणे विशिष्टवैशिष्ट्यबोधा
त्मकपरामर्शोत्पत्तौ तृतीयक्षणे एवानुमितिः स्वीक्रियते। एवं च तादृशव्याप्यत्वावच्छिन्न
बाधकाभावः च्छेदस्य उपदर्शितरीत्या प्रकारताशालिज्ञानत्वेनैव हेतुता वच्यते। अथ उपदर्शिताधेयत्वाव
च्छिन्नावच्छेदकतानिरूपकत्वरूपव्याप्यत्वावच्छिन्नस्य उपदर्शितरीत्या निवेशनीयत्वे
व्याप्तिप्रकारतानिरूपित ... त्वं नवकाशेन क्षणविलंबकल्पन

मन्यायांनच व्याप्तिप्रकारतानिरूपितहेतुप्रकारताशालिज्ञानत्वेन हेतुत्वे हेतुप्रकारतानिरूपि
तव्याप्तिप्रकारताशालित्वादिना हेतुतामादाय विनिगमनाविरह इति वाच्यं। भवन्मतेपि तादृशव्याप्ति
निष्ठावच्छेदकतानिरूपकहेतुप्रकारताशालिज्ञानत्वेन हेतुप्रकारतानिरूपितव्याप्तिनिष्ठावच्छे
दकताशालिज्ञानत्वेन वा हेतुत्वमित्यत्र विनिगमनाविरहतादवस्थ्यात्। न च विषयत्वेनैव सम
तादृशज्ञानस्य साक्षात्संबंधो न तु विषयतानिरूपितावच्छेदकतया अपि एवं च तादृशावच्छेद
कताशालिज्ञानत्वेन हेतुत्वे तस्याः स्वनिरूपकविषयताप्रतियोगित्वरूपपरंपरासंबंध एव
निवेश्यः तादृशप्रकारताशालिज्ञानत्वेन हेतुत्वे च हेतुप्रकारतायाः प्रतियोगित्वरूपस
साक्षात्संबंध इति विनिगमकसंभव इति वाच्यं। तन्निष्ठविषयतावच्छेदकतापास्तदीयविशे
ष्यतानिरूपितप्रकारतात्मकतया अवच्छेदकताया अपि प्रतियोगितासंबंधेन विशेषणत्वसंभवात् तद्
वत्त्वं विशेष्यविशेषणमिति रीत्या व्याप्याश्च वत्ताशालिज्ञानसाधारणव्याप्यादिविशिष्टबोधस्य तत्प्र
कारकत्वोपपत्तेः व्याप्त्यादिनिष्ठायां विशेष्यतावच्छेदकतायां प्रकारतात्वं अप्रामाणिकं वैशिष्ट्याकमि
ति तु विशेष्ये विशेषणमिति रीत्या तद्वत्ताशालिज्ञानीयविषयतायाः स्वाद्विशिष्टवैशिष्ट्यबोधस्य त्वव्याप
पकत्वं एव शक्यते वक्तुं। तदेवं दूषितमन्यथाव स्तुतो व्याप्यत्वावच्छिन्नायां हेतुतावच्छेदकावच्छि
न्नप्रकारताशालिज्ञानत्वेन हेतुत्वे व्याप्तिप्रमत्वयोरक[illegible]वच्छेदपमिति रीत्यैव हेतुनिरूपकी

स्तामां अवच्छेदकत्वं न तु धूमत्वस्य व्याप्तिधर्मितावच्छेदकत्वं तादृशायरामर्शादिविअनुमित्यापत्तेः ॥
न चेष्टापत्तिः तथा सति तादृशज्ञानस्य विरोधज्ञानव्यभिचारज्ञानाप्रतिबन्धतया विरोधव्यभिचा
रयोर्हेत्वाभासत्वानुपपत्तिः। तस्मात् द्वारणाय व्याप्तिप्रकारतानिरूपितविशेष्यतात्वेन धूमत्वावच्छि
न्नत्वमवश्यं हेतुप्रकारतायां निवेशनीयं। यत्र धूमत्वादेर्व्याप्तिधर्मितावच्छेदकत्वं तत्र धूमादिप्र ५८
कारतायामेव व्याप्तिप्रकारतानिरूपितविशेष्यतात्वेन धूमत्वाद्यवच्छिन्नत्वात् उपदर्शितस्थले तु पक्षधू
मविषयतायां व्याप्तिप्रकारतानिरूपितविशेष्यतात्वव धूमत्वावच्छिन्नत्वयोः सत्वेपि न तस्यास्तादृशवि
शेष्यतात्वेन धूमत्वावच्छिन्नत्वं। अपि तु धूमादिप्रकारतात्वादिनेवेति न तादृशज्ञानादनुमित्यापत्तिः—
इ संवव्याप्यत्वाद्यवच्छिन्नत्वनिवेशनमफलमेवेति चेन्न। व्याप्यत्वाद्यवच्छिन्नत्वस्य प्रकारता
यां अनिवेशे वह्निव्याप्यवह्निव्याप्यभाववद्धूमवान् पर्वतः इत्याकारकात् व्याप्यांशे संशयात्मकज्ञा
नादनुमित्यापत्तिवारणाय तदंशे निश्चयत्वमधिकं निवेश्यं। अस्मन्मते तु तादृशसंशयात्मकज्ञानीयधू
मादिप्रकारतायां व्याप्यत्वावच्छिन्नत्वविरहादेव न तदुत्तरं अनुमितिप्रसंग इति न तदंशे निश्चयत्वनिवे
श इति लाघवं। न च धूमो वह्निव्याप्य इत्येतादृश विशेषणतावच्छेदकप्रकारकनिश्चयानंतरोत्पन्नस्य
व्याप्यभावांशे आहार्यस्य तथाविधसंशयस्य व्याप्यत्वावच्छिन्नप्रकारताशालित्वेनाध्यकाभावः

।।अ॰प॰।
२।७।।

कल्वे ६

तस्सर्वं तादृशप्रकारतानिरूपितसामान्याः सत्वादिति वाच्यं। विशिष्टवैशिष्ट्यबोधं प्रति आहार्यानाहा-
र्य[redacted] साधारणविशेषणतावच्छेदकप्रकारकसंशयाभावस्य कार्यसहभावेन हेतुत्वोपग-
मात् तत्र कार्यकाले तथाविधसंशयसत्वे न तादृशज्ञानस्य तथाविधप्रकारताशालित्वसंभवात् उप-
स्मेदनज्ञानं तत्परामर्शकारणतायां व्याप्यत्वेनिश्चेयत्वनिवेशापेक्षया तद्विशिष्टवैशिष्ट्यबोधं
तदभावप्रकारकसंशयाभावहेतुत्वकल्पनस्य उचितत्वात्। अथ तद्विशिष्टवैशिष्ट्यबोधं प्रति तदभा-
वप्रकारकसंशयस्य प्रतिबन्धकत्वे विशेष्ये विशेषणमिति रीत्या तत्प्रकारकज्ञानसाधारणतत्प्रकारतानि-
रूपितप्रकारताशालिबुद्धित्वेनैव प्रतिबध्यतावच्छेदकमिति वाच्यं। एवं च विशेष्ये विशेषणमिति रीत्या
पिवह्निव्याप्यवान् ह्रदाभाववद्वृत्तिमवान्पर्वत इत्याकारकज्ञानं नोत्पद्यते कार्यकाले व्याप्यत्वाभावप्र-
कारकज्ञानरूपप्रतिबन्धकसत्वादिति। व्याप्यत्वावच्छिन्नत्वस्य हेतुप्रकारतायामनिवेशे विन-
व्याप्यत्वेनिश्चेयत्वनिवेश इति चेत्। एवमपि हेतुप्रकारतायां व्याप्तिनिष्ठहेतुप्रकारतानिरूपितवि-
शेष्यतात्वेन धर्मत्वावच्छिन्नत्वे निवेशनीये व्याप्तिनिष्ठप्रकारतात्वेन तादृशप्रकारतासामान्य-
निवेशापेक्षया व्याप्तिनिष्ठावच्छेदकतात्वेन अवच्छेदकत्वाख्यप्रकारतामात्र तदितरप्रकार-
तानामनिवेशे लाघवात्तेन रूपेण तन्निवेशनमेवोचितं। न चैवं विशेष्ये विशेषणमिति रीत्याव-
रामर्शव्यावृत्तरूपेण जनकत्वे तादृशपरामर्शादनुमितिसंदेहेन व्यभिचार संदेहेऽतादृशपरामर्श

साध्यारणत्वेण जनकत्वमेवोचितमिति वाच्यं। लाघवसत्वेन व्यभिचारसंदेहस्य अकिंचित्करत्वादिति [redacted] वि।
शिष्टवैशिष्ट्यावगाहिपरामर्शस्य वह्न्यनुमितिहेतुरिति दिक्। वह्निव्याप्यधूमवान्पर्वत इत्यादिसंशयादनुमित्यापत्ति
वारणाय प्रकारतावच्छेदककोटौ निश्चयत्वनिवेशः। अयमत्र निश्चयत्वं न वह्निव्याप्यधूमाभावप्रकारकत्वे
सति वह्निव्याप्यधूमप्रकारकत्वं। वह्निव्याप्यधूमवान्महानसीयधूमाभाववांश्च पर्वत इत्याकारक
धूमविशेषाभावावगाहिज्ञानादनुमितिर्न स्यात्। धूमत्वावच्छिन्नप्रतियोगिताकाभावं [redacted]
प्रकारकत्वनिवेशे च तद्दोषतादवस्थ्यं। महानसीयत्वविशिष्टधूमत्वस्य धूमत्वानतिरेकितया तदवच्छिन्न
प्रतियोगिताकाभावस्यापि धूमत्वावच्छिन्नप्रतियोगिताकत्वात्। न च शुद्धधूमत्वावच्छिन्नप्रतियोगि
ताकाभावाप्रकारकत्वनिवेशान्न दोषः। शुद्धधूमत्वावच्छिन्नत्वं च धूमत्वनिष्ठनिरवच्छिन्नाव
च्छेदकताकत्वं। यत्र च महानसीयत्वादिविशिष्टधूमत्वनिष्ठावच्छेदकता तत्र महानसीयत्वादिरूपस्य अ
वच्छेदकविशेषणस्य अवच्छेदकतावच्छेदकतया धूमत्वनिष्ठावच्छेदकतायाः सावच्छिन्नत्वादिति वा
च्यं। एवं सति वह्निव्याप्यत्वावच्छिन्नसामान्याभाववह्निव्याप्यधूमत्वावच्छिन्नसामान्याभावकोटिक
संशयस्यावारणात्। न च व्याप्तिभिन्नत्वे सति धूमत्वभिन्नो यो धर्मस्तदवच्छिन्नप्रतियोगिताका [redacted]
भावाप्रकारकत्वं अकृते निश्चयत्वं। महानसीयत्वादिविशिष्टधूमत्वानवच्छिन्नप्रतियोगितायां
च महानसीयत्वादिविशिष्टधूमत्वस्य धूमत्वविशिष्टमहानसीयत्वस्य वाऽवच्छेदकत्वमिति तत्र
विनिगमनाविरहेण महानसीयत्वादेरपि अवच्छेदकतया तादृशोऽभावः व्याप्तिभिन्नत्वे सति

वह्निव्याप्याभाववान्वह्निमान्धूमवा...

धूमत्वभिन्नो यो धर्मस्तदवच्छिन्नप्रतियोगिताकएव अतो न तत्प्रकारकोद्भवज्ञानासंग्रहः। व्याप्तिवि
शिष्टधूमत्वावच्छिन्नाभावश्चस्य धूमत्वावच्छिन्नाभावश्चस्य व्याप्यत्वावच्छिन्नाभावाभ्रुतथावि
ध्यधर्मान्तरानवच्छिन्नप्रतियोगिताकाएव अतो न तत्तत्कोटिकसंशयसाधारण्यमिति वाच्यं। समनि
यताभावानामभिन्नतया धूमत्वावच्छिन्नप्रतियोगिताकाभावस्यापि स्वसमनियतधूमं[illegible]प्रका त्व
रकप्रमाविशेष्यत्वाद्यवच्छिन्नप्रतियोगिताकाभावरूपतया व्याप्तिधूमत्वातिरिक्तधर्मावच्छिन्न
प्रतियोगिताकत्वात् तथाविधधर्मावच्छिन्नप्रतियोगिताकाभावस्यैवाप्रसिद्धेः। यदि च धूमत्वाद्य
.त्व वच्छिन्नाभावस्य धूमप्रकारकाणां प्रमाविशेष्यत्वाद्यवच्छिन्नाभावाभिन्नत्वेपि तत्प्रतियोगिता
द्वयीदृकाधूमत्वाद्यवच्छिन्ना अपरा च प्रमाविशेष्यत्वाद्यवच्छिन्ना अवच्छेदकभेदेन प्र
तियोगिताभेदात्. एवं च धूमत्वाद्यवच्छिन्नप्रतियोगितायां व्याप्तिधूमत्वाद्यतिरिक्तधर्मानव
च्छिन्नत्वात् तादृशप्रतियोगिताकत्वं तदभावस्याक्षतमेवेति मन्यते तदा महानसीयधूमा
भावादेरपि तादृशप्रतियोगिताकत्वं अक्षतमेवेति। तादृशाभावीयमहानसीयत्वादिविशिष्ट
धूमत्वावच्छिन्नप्रतियोगितायां धूमत्वविशिष्टमहानसीयत्वाद्यवच्छिन्नप्रतियोगितान्यतमा
धूमत्वान्यधर्मावच्छिन्नत्वात्। न च महानसीयत्वाद्यवच्छिन्नधूमाभावप्रतियोगितायां भि
न्नो विशेष्यविशेषणभावात् धूमत्वमहानसीयत्वयोः कीसपवत्यवच्छेदकत्वं स्वीक्रियते न क
सामानाधिकरण्यसंबन्धेन एकविशिष्टापरस्य सामानाधिकरण्यप्रवेशाधिक्येन गौरवात्

एवं च तादृशाभावप्रतियोगितायां महानसीयत्वाद्यवच्छिन्नत्वनियमेन न तस्य धूमत्वान्यधर्मानव
च्छिन्नप्रतियोगिताकत्वमिति वाच्यं। अवच्छेदकतायाः व्यासज्यवृत्तित्वस्यान्यत्र दूषितत्वात्। एकविशिष्टा
परस्य अवच्छेदकतायाऽवश्यकत्वात् तथा च अभावप्रतीतौ प्रतियोगिविशेषणतापन्नस्यैव प्रतियोगित
वच्छेदकत्वे वह्निप्रतियोगितावच्छेदकविशेषणतापन्नस्यैव प्रतियोगितावच्छेदकतावच्छेदकत्वनिय
मात् इदं नास्तीत्यादौ तु प्रतियोगितावच्छेदकं इदं त [redacted] त्वादेर्विशेषणतया भानात्। एवं च मह
नसीयधूमो नास्तीत्यादौ धूमांशे एव महानसीयत्वादिविशिष्टबोधकशब्दोल्लेखितत्वाद्धूमत्वांशे तर्द
महानसीयत्वाद्यप्रकारत्वात्तत्र धूमे महानसीयत्वादेर्धूमत्वनिष्ठावच्छेदकत्वमिति तदसत्। सामानाधिक
रण्यातिरिक्तसंबंधेन यत्रावच्छेदकतावच्छेदकत्वं तत्रैव तथा नियमात्। अवच्छेदकविशिष्टधर्मिविशेष
णतया भासमानधर्मस्यापि सामानाधिकरण्यसंबंधेन अवच्छेदकतावच्छेदकत्वे बाधकाभावात्
प्रतियोगिविशेषणतया भासमानधर्मस्य प्रतियोगितावच्छेदकत्वनियमात् महानसीयत्वादेरपि
प्रतियोगितावच्छेदकत्वं स्यादिति चेत्। इत एव विनिगमनाविरहेण धूमत्वविशिष्टमहानसीयत्वादेरपि
प६ प्रतियोगितावच्छेदकत्वमिति। अत्रोच्यते। व्यासज्यनिष्ठावच्छेदकताभिन्ना प्रतियोगि धूमत्वनिष्ठावच्छेदक
ताभिन्ना अवच्छेदकता तन्निरूपकप्रतियोगिसंसर्गावच्छिन्नप्रकारतानिरूपितअभावप्रकारतानिरूपितपर्व पि४
तत्वाद्यवच्छिन्नविशेष्यताकान्यत्वघटितमेव धूमपरामर्शस्य निश्चयत्वं। एवमन्यत्रापि बोध्यं।
वह्निव्याप्यधूमवान् पर्वतो महानसीयधूमाभाववांश्च इत्यादिसमूहालंबने च प्रतियोगितासंसर्गा
वच्छिन्नधूमत्वावच्छिन्नप्रकारतायां महानसीयत्वा... दकं न तु धूमत्वनिष्ठप्रकारताक

छेदकतायाः विषयतानिरूपितस्य अवच्छेदकत्वस्य तन्निरूपितप्रकारताविशेषात्मकतया तदंशे प्रकारीभूतध
र्मस्यैव तन्निष्ठविषयतावच्छेदकत्वात् । एवं च तादृशीयप्रतियोगिप्रकारताया धूमत्वादिनिष्ठावच्छे
दकताभिन्नमहानसीयत्वादिनिष्ठावच्छेदकतानिरूपकत्वात् उपदर्शितावच्छेदकत्वानिरूपकप्रति
योगिप्रकारतानिरूपितअभावप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकान्यत्वं तस्या
तथ स्तत एव वह्निव्याप्यतद्विशिष्टधूमत्वाद्यवच्छिन्नाभावकोटिकसंशयवारणाय व्याप्तिनिष्ठावच्छेदक
ताभेदः प्रतियोगिकोटौ निवेशितः । एतेन वास्तवधूमत्वाद्यवच्छिन्नाभावप्रकारत्वनिवेशे घटाभा क
वादिना धूमाभावप्रकारकसमूहालंबनस्यासंग्रहः । धूमाभावत्वादिना घटाभावकोटिकसंशयसंग्र
हश्चेत्यपि निरस्तम् । उपदर्शितनिश्चयत्वशरीरे वास्तवधूमत्वाद्यवच्छिन्नाभावविषयताया अनिवेशात् धूम
त्वादिनिष्ठावच्छेदकताया निरवच्छिन्नायास्तया । अतो जातिविशेषत्वादिना धूमत्वाद्यवगाहिनो जातिवि
शेषवदभाववान् वह्निव्याप्यधूमवान् धूमध्वंसवान् पर्वत इत्यादिकस्य नो संग्रहः । तादृशप्रतियोगितासंसर्गावच्छिन्न
प्रकारतानिरूपितअभावप्रकारताशून्यत्वमात्रनिवेशे धूमाभाववद्वृत्ति वह्निव्याप्यधूमवान् पर्वत इ
त्यादिनिश्चयासंग्रहः इति तादृशप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकान्यत्वपर्यंतमिवेशः
वह्निव्याप्यधूमवद्भेदकोटिकसंशयवारणाय व्याप्तिनिष्ठावच्छेदकत्वधूमत्वनिष्ठावच्छेदकत्वभिन्नाव
च्छेदकत्वानिरूपकं यत्किंचिद्विषयतावच्छिन्नमवच्छेदकत्वं तदतिरिक्तावच्छेदकत्वानिरूपितप्रतियोगिप्रका
रतानिरूपितभेदप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताकान्यत्वमपि निवेशनीयं । व
ह्निव्याप्यधूमवान् पर्वतो धूमवन्महानसभिन्नश्चेत्याकारकनिश्चयसाधारणाय वह्निधूमत्वनिष्ठा

तिनिष्ठावच्छेदकत्वानिरूपकं यदवच्छेदकत्वं तन्निरूपकत्वमुपेक्ष्य तादृशा [redacted] वच्छेदकत्वा
तिरिक्तावच्छेदकत्वानिरूपकत्वं प्रतियोगिताप्रकारतायां निवेशितावह्निव्याप्यधूमवान् तदभाववांश्च पर्व
तइत्येतादृशसमूहालम्बनानुमित्युपपत्तयेउपदर्शिततद्रूपप्रकारतानिरूपितअभावप्रकारतायां धूमनिरू
पितविरोधित्वावच्छिन्नत्वमप्यवश्यं निवेशनीयं। समुच्चये कोटिप्रकारतायां विरोधस्यानवच्छेदकत्वे
पानतरसंग्रहः। न च व्याप्त्यादिनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकप्रतियोगिताप्रकारतानि
रूपितत्वेन तत्र निवेश्यते प्रयोजनोभावातावह्निव्याप्यधूमवान्महानसीयधूमाभाववांश्च पर्वत
इत्यादिज्ञानीयअभावप्रकारतायां धूमनिरूपितविरोधित्वा[illegible]वच्छिन्नतयातदसंग्रहापत्तेः। न च
वह्निव्याप्यधूमवान्पर्वतो महानसीयधूमवान्न वेत्याकारकांशिकसंशयात्मकपरामर्शीयाभा
वप्रकारतायां महानसीयधूमनिरूपितविरोधित्वावच्छिन्नतया तादृशविरोधस्यापि धूमनिरूपित
त्वात्तदसंग्रहो दुर्वार एवेति वाच्यं धूमाधिकरणवृत्तित्वसामान्याभावरूपविरोधावच्छिन्नत्वस्ये
व निवेशनीयतया महानसीयधूमाधिकरणवृत्तित्वरूपविरोधावगाहिनश्च उक्तपरामर्शस्य संग्र
हसंभवात्। न चैवं वह्निव्याप्यत्वावच्छिन्नाधिकरणवृत्तित्वरूपविरोधावगाहि व्याप्यत्वावच्छिन्नाभावकोटिकसं
शयस्यापि संग्रहप्रसंगः। तादृशविरोधस्यापि धूमाधिकरणवृत्तित्वसामान्याभावरूपविरोधान्यत्वादिति वा
च्यं वह्निव्याप्यवृत्तित्ववह्निव्याप्यधूमवद्वृत्तित्वधूमवद्वृत्तित्वावच्छिन्नाभावात्मकविरोधनिष्ठावच्छेदक
तानां वह्निव्याप्यत्वधूमत्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकावच्छेदकत्वनिरूपकाधि
करणनिष्ठावच्छेदकत्वनिरूपकाधेयत्वनिष्ठावच्छेदकत्वनिरूपकाभावत्वावच्छिन्नावच्छेदकतालेन

॥अ॰प॰॥
॥१२॥

अनुगमय्य निवेशेन वह्निव्याप्यत्वावच्छिन्नाभावकोटिकसंशयवारणसंभवादानवयत्र वह्निव्याप्यधूमवान्
मपर्वतो महानसीयधूमवान्न वेत्यादिसंशये महानसीयधूमाभावांशे धूमवद्वृत्तित्वादिसामान्या
भावरूपविरोध्यस्य भानेतादृशज्ञानादनुमित्यनुदयप्रसंगद्वृत्तित्वाच्च। विरुद्धत्वेन ज्ञातस्याणुत्वकुरूप
त्वादिरूपभावद्वयकोटिकसंशयस्यैव तादृशज्ञानस्यापि वह्निव्याप्यधूमाद्यंशे संशयत्वोपगमात्तदनंत
सा॰नु॰५ रमनुमित्युत्पादस्यैव त्वात्। एवं च विरोध्यावच्छिन्नप्रकारतात्वेन धूमाद्यंतताभाव तदन्यान्याभाव
प्रकारतानामनुगमात्। अन्योन्याभावकोटिकसंशयवारणाय विशेषणं तरङ्गवेशा निरर्थकमेव॥
केचित्तु समुच्चयसाधारणाय विरोध्यावच्छिन्नत्वे अभावप्रकारतायां न निवेश्यते। तदभावप्रकारत्व
निरूपिततत्प्रकारतानिरूपितविशेष्यताशालिज्ञानत्वेनैव हेतुत्वाभ्युपगमात्। समुच्चयात्मकज्ञा
नस्य धूमाभाववत्प्रकारकत्वेपि तत्प्रकारताभेदेन विशेष्यताभेदात् तदीयधूमत्प्रकारतानिरूपितवि
शेष्यतायास्तदभावप्रकारतानिरूपितविशेष्यताभिन्नत्वेन अनुपपत्यभावात्। संशये तु विरुद्धो
भयकोटिप्रकारतानिरूपितात्मकैव विशेष्यता अतो न तस्मादनुमितिः। न चैकत्रद्वयमिति रीत्यो
उभयविशेषणकबोधे प्रकारताभेदेन विशेष्यताभेदोऽवश्यमंगीकार्यः। अन्यथा समूहालंब
नात्तादृशज्ञानस्य वैलक्षण्यानुपपत्तेः। एवं च एकत्र द्वयमिति रीत्या धूमतदभावोभयकोटिकस
मुच्चयालंबकज्ञानादनुमित्यनुदयापत्तिरिति वाच्यं। एकत्र द्वयमिति रीत्या विरुद्धभावाभावकोटिक
ज्ञानस्य समुच्चयत्वानुपगमात् तस्यैव संशयत्वात् ज्ञानत्वेन अपि तदंततामावतदन्याभावप्रका
रतयोरनुगमापविरोधित्वविशि [illegible] यमितिरीत्याधूमघटाभाव

न्यविशेषणत्वपर्याप्तसंसर्गत्वनियामकतिर्यो विषयताभनिवेश्य अभावप्रकारतात्वेन तयोरनुगमा-
संभवादितिवाच्यं तदवच्छिन्नकारणत्वनिरूपिताभावतद्वद्भिन्नत्वरूपविरोध्ययोरनुगमासंभवेन प्रत्येकं
तदवच्छिन्नत्वस्य निवेशनीयतया तदपेक्षया लाघवेन विशेषणतया भेदतदभावप्रकारत्वानिरू-
पितत्वतद्वदन्योन्याभावप्रकारत्वानिरूपितत्वयोरेव निवेशयितुमुचितत्वादिति वदन्ति तदसत् व-
ह्निव्याप्यधूमवान् पर्वतो जलत्ववान् वेत्याकारकभावद्वयकोटिकसंशयवारणासंभवात् विरोध्य-
वच्छिन्नविरोधिकोटिप्रकारतानामनुगमस्य आवश्यकत्वात् न चैकसंबंधघटितविरोध्यवच्छि-
न्नापरसंबंधावच्छिन्नविरोधिजलत्वादिप्रकारताशालिपरामर्शसंग्रहाय धूमवत्समवेतत्वादि-
रूपविरोध्यावच्छिन्नसमवायादिसंबंधावच्छिन्नप्रकारतात्वेनैव जलत्वादिप्रकारता निवेशनीया
तथा च कथं तेन रूपेण विशेषणताविशेषघटितविरो~~[illegible]~~ध्यावच्छिन्नप्रकारताके-
न तदभावतद्वदन्योन्याभावप्रकारतयोः संग्रह इति वाच्यं विशेषणताविशेषघटितविच्छिन्नत्वरूपेणैवं तत्सा-
मान्यत्रद्रव्यत्वाभावादिर्जलत्वाभावादिरेव वा कोटिस्तादृशसंशयवारणायतथाविरोध्यवच्छिन्नतत्संसर्गा-
वच्छिन्नप्रकारतात्वेन तादृशसंशयप्रकारतानुगमयतो न्यत्वस्य ज्ञानांशे तदनिरूपितत्वस्य वा विशे-
ष्यत्वांशेऽवश्यं निवेशनीयतया तादृशधूमाभावादिप्रकारतायाश्च तादृशरूपतया संग्रहात् यत्तु तदभाव-
तद्वदन्योन्याभावकोटिकस्तत्संशयप्रतिबन्धकतावच्छेदकतया स्थाणुर्वा पुरुषो वेति संशयस्थाणुत्वतदभाववत्पुरुष-
त्वतदभाववत्कोटिकएवेति वाच्यं तन्न। अभावकोटिभासे सामग्र्यसत्त्वेऽप्येकसामग्र्यां समाजात्०

तत्संसर्गावच्छिन्न

व्या.प.॥

॥१२३॥ भावद्वयमात्रकोटिकसंशयेबाध्यकाभावात् वस्तुतः संशयेपि प्रकारताभेदेन विशेष्यताभेदस्यव्यवस्थापि[illegible]त
त्वान्नकिंचिदेतत् अथ पक्षतावच्छेदकसामानाधिकरण्यमात्रेण ध्वमध्वमाभावोभयकोटिकव्यो[redacted] व्यवर
ताशीज्ञानादनुमित्यनुदयापत्तिः। उपदर्शितनिश्चयत्वस्य तत्साधारण्यविरहात्। न चैतादृशज्ञानस्य सं
13 शयतयानुत्पत्त्यैव ततोऽनुमितिरितिवाच्यं। यतस्तादृशज्ञानस्य संशयत्वे तत्प्रकारकानुमितौ तदन्न
वच्छाव्यवताज्ञानप्रतिबंधकत्वेपि पक्षतावच्छेदकसामानाधिकरण्यमात्रेणाभयव्याप्यवत्ताज्ञा
नात् संशयानुमित्यापत्तिः। स भवति सामानाधिकरण्यमात्रावगाहितया तथाविध्यतदभाववत्ता
ज्ञानस्यापि अवच्छेदकावच्छेदेनवह्न्यनुमितिप्रतिविरोधित्वादिति। नयचकुतांतरभावव्याप्यवत्ताज्ञा
नप्रतिबंधकतायां संशयानुमितिवारणासंगतिः। तस्मादवच्छेदकावच्छेदेनान्यतरकोटचवगाहिसंश
यइति। उपदर्शितपरामर्शादनुमितिः। न चैवं पक्षतावच्छेदकावच्छेदेन विरोधिप्रकारताकान्यत
मेवे[illegible]न्निवेशनीयमितिवाच्यं। पक्षतावच्छेदकसामानाधिकरण्यमात्रेण विरोधिकोटचवगाहिनो
ऽवच्छेदकावच्छेदेन व्याप्यकोटचवगाहिनः संशयादनुमित्यापत्तेः। न च सामानाधिकरण्यमात्रा
वगाहि व्याप्यवत्तानिर्णयत्वेन हेतुत्वान्नोपदर्शितस्य तत्संशयादनुमित्यापत्तिः। अवच्छेदकावच्छे
देन हेतुमत्ताज्ञानाच्छावच्छेदकावच्छेदेनानुमितेरेवास्वत्त्यात्तत्र हेतुत्वांतरकल्पनायां आवश्यकत्वा
तरसाततस्याकिंचित्करत्वादिति ... सामानाधिकरण्यमात्रादि बाध्यकाले ऽवच्छेदकावच्छेदेन १२

हेतुमत्तापरामर्शादपि सामानाधिकरण्यमागोच्यनुमितेरेवोदयात्तत्संग्रहस्यावश्यकत्वात्‌ । पर्वतत्वा
वच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावगाह्यवच्छेदकीभूतप्रकारताशून्यत्वस्य निरूपक
त्वोभयसंबंधेन धूमप्रकारतावज्ज्ञानत्वमेव धूमनिष्ठं यत्वं । अवच्छेदकावच्छेदेन धूमाभा
भावावगाहि धूमवन्नाज्ञानं सामानाधिकरण्यमात्रेण धूमाभावावगाहि अवच्छेदकावच्छेदेन धू
माद्यवगाहि ज्ञानं च यादृशधूमप्रकारतानिरूपकेन तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंध
कतावच्छेदकीभूतप्रकारताशून्यं धूमप्रकारकज्ञानसामान्यं प्रत्येवावच्छेदकावच्छेदेन धूमाभा
वादिप्रकारताशालिज्ञानत्वेन प्रतिबंधकत्वात्‌ । तादृशज्ञानीयधूमाभावादिप्रकारतापाधूमप्रकारता
सामान्यावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वात्‌ । अवच्छेदकावच्छेदेन धू
मादिप्रकारकज्ञानत्वावच्छिन्नं प्रतिबध्यधूमाभावप्रकारताशालिज्ञानत्वेन प्रतिबंधकत्वात्‌ सामा
नाधिकरण्यमात्रेण धूमाभावावगाहिज्ञानीयधूमाभावादिप्रकारतापा अवच्छेदकावच्छेदेन
धूमवत्ताज्ञानीयधूमप्रकारतासामान्यावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकताव
च्छेदकत्वात्‌ । पत्र च सामानाधिकरण्यमात्रेण धूमवद्धूमाभावोभयमात्रस्य प्रमा

धिर

रतातादृशज्ञानस्यउपदर्शितसंबंधेनधूमप्रकारतावत्त्वमस्तमेवासामानाधिकरण्येनधूम
प्रकारकबुद्धौसामानाधिकरण्यमात्रेणधूमाभावप्रकारकबुद्धेरविरो[illegible]तयातादृशज्ञानीयप
15 धूमाभावादिप्रकारतायास्तादृशज्ञानीयपक्षमप्रकारतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकत्वा
नवच्छेदकत्वादितितद्दसत्वात्प्रतिबन्धकत्वादेरनन्यथासिद्धनियतपूर्ववर्तित्वादिकारणरूप
नप त्वादितत्वेनानुगमात्। अतोऽप्यते। सामानाधिकरण्यमात्रावगाह्यनुमितौअवच्छेदकावच्छे
ताक्षाद दनविरोधिप्रकारोन्यसामानाधिकरण्यमात्रावगाहिधूमनवत्ताज्ञानत्वेनहेतुतानवच्छे
दकावच्छेदनहेतुमत्ताज्ञानासंग्रहान्नेदंसम्यगित्युक्तंप्रागितिकाच्यं। अवच्छेदकावच्छे
दनानुमितिंप्रतितादृशहेतुमत्ताज्ञानस्यहेतुतायाऽऽवश्यकत्वादिति। सामानाधिकरण्यमा
त्रावगाह्यनुमितिसाधारणैवहिविधेयकानुमितित्वस्यैवावच्छेदकत्वमितिवयतामभिवेश्य
तेऽन्यतावच्छेदकत्वोपगमात्तदसंग्रहस्यादोषत्वात्। ज्ञानत्वेवंसामानाधिकरण्यमात्राव
गाहिनोधूमकालीनापामवच्छेदकावच्छेदनहेतुमत्ताज्ञानस्यान्यसामानाधिकरण्यमात्राव
गाह्यनुमितौसामानाधिकरण्यमात्रावगाहिहेतुमत्ताज्ञानस्यसामानाधिकरण्यमात्राव

गाहिहेतुमत्ताज्ञानजन्यतथाविधानुमितौ अवच्छेदकावच्छेदनहेतुमत्ताज्ञानस्य च व्यभिचार इति वाच्यं । अन्य
लिंगकानुमितौ व्यभिचारवारणाय तत्तत्परामर्शजन्यतावच्छेदककोटौ तत्तत्परामर्शाव्यवहितोत्तरत्वस्य नि
वेशावश्यकतया तत एव सर्वत्र व्यभिचारवारणसंभवात् । केचित्तु अवच्छिन्नविशेषणतासंसर्गा
वच्छिन्नधूमाभावादिप्रकारताशून्यत्वविशिष्टशुद्धसंयोगादिसंसर्गावच्छिन्नधूमप्रकार
ताशून्यत्वविशिष्टधूमाभावादिप्रकारत्वाभाववत्त्वमेवोभयपरामर्शसाधारणं निष्कृष्टत्वे
सामानाधिकरण्येनोभयप्रकारताशालिज्ञाने धूमाभावप्रकारतासत्त्वेऽपि तादृशशुद्धसंयोगादि
संसर्गावच्छिन्नधूमप्रकारताशून्यत्वरूपविशेषणाभावेन तद्विशिष्टधूमाभावादिप्रकारत्वा
भाववत्त्वमप्यत एवा । यत्रावच्छेदकावच्छेदेन धूमाभावादिः प्रकारः सामानाधिकरण्येन
धूमः प्रकारः तत्र तादृशविशिष्टाभावसत्त्वेऽपि विशेषणदलाभावात्तन्निरास इति वदन्ति । तदप
रा । तेन रूपेण हेतुत्वे गौरवात् प्रयोजनाभावाच्च । अथ नीलपर्वतो वह्निव्याप्यधूमवान्नवा
वह्निव्याप्यधूमवांश्च पर्वत इत्याकारका[?]त्पर्वतत्वसामानाधिकरण्येन धूमवत्ताज्ञाना
रनुमित्यनुदयापत्तिः । तादृशज्ञानस्य विरोधिप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशे
ष्यताशालित्वेनोपदर्शितनिरूप्यत्वासंभवात् । न च सामानाधिकरण्यसंबन्धेन हेतुम

॥अ॰प
॥१५॥

ताज्ञानकारणतायां शुद्धपर्वतत्वावच्छिन्नविशेष्यकविशेषणतासंसर्गावच्छिन्नधूमाभावप्रका
रताकान्यत्वस्यैव निवेशनीयतया नीलपर्वतत्वावच्छिन्नविशेष्यकविशेषणतासंसर्गकधू
माभावप्रकारकोपदर्शितज्ञानस्य संग्रह इति वाच्यं तथा सति नीलपर्वतो वह्निव्याप्यधूमवा
न्नवेति संशयादनुमित्यापत्तिर्दुर्वारेति चेन्मैवं शुद्धपर्वतत्वावच्छिन्नसामानाधिकर
ण्यमात्रावगाहिन्यामनुमितौ सामानाधिकरण्यमात्रावगाहिपरामर्शस्य शुद्धपर्वतत्वा
वच्छिन्नविशेष्यतानिरूपितविशेषणतासंसर्गावच्छिन्नविरोधिप्रकारताशून्यशुद्ध
पर्वतत्वावच्छिन्नविशेष्यतानिरूपितशुद्धसंयोगावच्छिन्नधूमप्रकारताशालिज्ञानत्वे
न हेतुता। अतो नोपदर्शितदोषावसरः। न च शुद्धपर्वतत्वावच्छिन्नस्य हेतुप्रकारतानिरूपि
तविशेष्यतायां निवेशे नीलपर्वतो वह्निव्याप्यधूमवानित्यादिपरामर्शात् पर्वतो न नील इत्या
दिबोधकाले पर्वतो वह्निमानित्याकारिकायाः शुद्धपर्वतत्वावच्छिन्नविशेष्यकानुमितेर
नुदयप्रसङ्ग इति वाच्यं। नीलपर्वतो वह्निमानित्याद्यनुमितौ नीलपर्वतत्वाद्यवच्छिन्नविशे
ष्यताकपरामर्शस्य हेतुताया ऽऽवश्यकत्वात्. तत्रैव नीलविषयतामभिव्याप्य शुद्धपर्वत
त्वाद्यवच्छिन्नपक्षकानुमिति [illegible] विशेष्यताकानुमितित्वस्य १५

वकार्यतावच्छेदकत्वोपगमात्। तादृशाकारणतायेव [redacted] नीलादिमानयं प्रतिबन्धकदशायामुपद
र्शितपरामर्शात् द्रुमस्य पर्वतत्वावच्छिन्नविशेष्यताकानुमित्युत्पत्तिः। न च नीलपर्वतत्वावच्छिन्नविशे
ष्यकधूमपरामर्शजन्यतावच्छेदककोटौ नीलादिविषयताया ऽनिवेशे द्रुमस्य पर्वतत्वावच्छिन्नविशेष्य
कपरामर्शजन्यायामनुमितौ तस्य व्यभिचार इति वाच्यं। अव्यवहितोत्तरत्वनिवेशस्यावश्यकतया
व्यभिचारानवकाशात्। केचित्तु नीलपर्वतो वह्निव्याप्यवानित्याकारकपरामर्शात् नीलादिप्रतिबन्ध
कबाधादिदशायां न तादृशतत्पर्वतानुमितिः। न च तत्रानुमितिस्वीकारे क्षतिविरहः। तथा सत्यपि क्लृप्त
कारणतयैवोपपत्तेः। परामर्शहेतुता वा कल्प्यमानाबाधितेति वाच्यं। परामर्शहेतुतानाधिक्येऽपि लाघववि
रहेण तत्रानुमितेरभ्युपगमस्य निर्युक्तिकत्वात्। न च तत्र अनुमित्यनभ्युपगन्तृमते तदानीं भिन्न
विषयकप्रत्यक्षोत्पत्त्या तदुपपत्तये च तत्रानुमितिसामग्रीप्रतिबन्धकतायां नीलादिमानयं प्रतिबन्ध
कबाधाभावादिरवश्यं निवेशनीयः। तत्रानुमितिस्वीकारे तु तदनिवेशेन लाघवसंभव इति वाच्यं।
तथाविधपरामर्शदशायां तादृशबाधादिसत्त्वे द्रुमस्य पर्वतत्वावच्छिन्नविशेष्यकानुमितिप्रतिबन्ध
कीभूततथाविधसिद्धेः सत्त्वे भिन्नविषयकप्रत्यक्षादेः त्वन्मतेऽनुत्पत्त्या तादृशपरामर्शघटितानु उ
मितिसामग्रीप्रतिबन्धकतायां तथाविधबाधाभावस्यापि निवेशस्य भवतो ऽप्यावश्यकत्वात्। परं तु तथावि
धबाधसत्त्वे ऽसत्त्वे द्रुमस्य पर्वतत्वावच्छिन्नविशेष्यकसिद्धौ मन्मते ऽनुमितेरेवोत्पत्त्या तदानीं भि
२४ अन्यथा नीलपर्वतो वह्निमानिति सेतादृशासिद्धेर्भावस्या... ...रनुत्पादप्रसंगात्। तथा च तादृशबाधाभा

॥ओं·प ॥१६॥

न्नविषयकप्रत्यक्षवारणाय तादृशबाध्याभावमनिवेश्य नीलपर्वतत्वावच्छिन्नविशेष्यकपरामर्शघटितानुमि- १६
तिसामग्र्याः प्रतिबन्धकत्वात्तदावश्यकमिति विपरीतमेव गौरवं। अस्तु पर्वतत्वावच्छिन्नविशेष्यकसामग्रीप्र-
तिबन्धकतायामुक्तयुक्त्या परामर्शेऽपि पर्वतत्वावच्छिन्नविशेष्यताकत्वनिवेशस्यावश्यकतया तत्प्रतिब-
न्धकतायाऽनिर्वाहात्। एतेन नीलपर्वतो वह्निव्याप्यधूमवानित्यादिपरामर्शादुपदर्शितबाध्यादिकाले
तादृशानुमितिस्वीकारेऽनुमित्साविशिष्टतादृशपरामर्शघटितसामग्रीप्रतिबन्धकतायां नीलादिमानप्रति-
बन्धकबाध्याभावानिवेशेन लाघवात्तादृशबाध्यादिदशायां सत्यामपि सिसाधयिषासिसाध्यषिबात्वेन ता-
दृशानुमितेरेवोत्पत्त्या भिन्नविषयकप्रत्यक्षानुदयादिति स्वपरास्तम्। उक्तयुक्त्याऽनन्तसामग्रीप्रतिबन्धकता-
यां क्लृप्ततादृशलाघवस्याकिञ्चित्करत्वादित्याहुः। अन्ये तु पर्वतो न नील इति बाधनिश्चयकाले नील-
पर्वतो वह्निव्याप्यधूमवानित्यादिपरामर्शात्पर्वतो वह्निमानित्यनुमितिस्वीकारे भिन्नविषयकप्रत्यक्ष-
प्रतिभिन्नविषयकानुमितिसामग्रीप्रतिबन्धकतायां पर्वतो न नील इत्यादिबाध्याभावानिवेशेन प्रयुक्त-
लाघवमपि न संभवति। अनीलो वह्न्यभाववान् नीलाभाववान् वह्न्यभाववानित्यादिबाधविशिष्टायाः तथा-
विधबाधबुद्धेरवच्छेदकधर्मदर्शनविधया पर्वतत्वावच्छिन्नविशेष्यकवह्निविशिष्टबुद्धिसामान्यप्र-
तिबन्धकतया तादृशसामग्रीप्रतिबन्धकतायामवच्छेदकधर्मदर्शनाभावनिवेशापेक्षया तन्निवेशस्यै-
वोचितत्वात्। तदनिवेशे च तादृशावच्छेदकधर्मदर्शनदशायां भिन्नविषयकप्रत्यक्षोपपत्तेरभावेन १६

पर्वतोनन्नील इत्यादिबाधसत्वेच ४

विशेष्यावश्यकतयागौरवादितिवदंति। अत्रेदं बोध्यं। बाध्यकाले नीले पर्वते वह्निव्याप्यधूमवानित्यादिपरामर्शात्

मु०२ पर्वतो वह्निमानित्यनुमित्यनुभवेनतादात्म्यादिसंबंधेन वह्निव्याप्यवान्नीलपर्वतत्वावच्छिन्नहेतुकमुख्यपर्वतत्वा

वच्छिन्नपक्षकवह्न्यनुमितिसामग्र्याः भिन्नविषयकप्रत्यक्षं प्रतिबंधकत्वाकल्पनेन लाघवात् तादृशानुमितिज

नकीभूतवह्निव्याप्यवह्निमान् व्याप्यवन्नीलपर्वतवान् पर्वत इत्याकारकपरामर्शघटितसामग्रीकाले नीलपर्वतत्वावच्छिन्नवि

शेष्यकवह्निव्याप्यवत्तानिर्णयघटितमुख्यपर्वतत्वावच्छिन्नविशेष्यकवह्निविधेयकानुमितिसामग्रीसत्तायाआवश्य

कत्वात्तत्प्रतिबंधकतयैवोपपत्तेः। अपपक्षस्य मुख्यविशेष्यकपरामर्शस्यैवानुमितिहेतु[illegible]तायाः पाकानुमाने पक्षध

र्मिभेदः कुत्रचिदगृहीतत्वान्नीलपर्वतत्वावच्छिन्नविशेष्यकपरामर्शघटितानुमितिसामग्रीप्रतिबंधकतायां तदवच्छिन्न

मुख्यविशेष्यताकत्वेपरामर्शेऽवश्यं निवेशनीयं। एवं च उक्तविधविधर्मावच्छिन्नहेतुकपरामर्शदशायां नीलपर्व

तविशेषणकस्यैव परामर्शस्य सत्वेन नीलपर्वतत्वावच्छिन्नविशेष्यकपरामर्शघटितसामग्रीनिवेश्यत्वाभावात् उक्तसा

मग्र्याः प्रतिबंधकत्वांतरकल्पनायाआवश्यकत्वादवच्छिन्नलाघवावकाशादृचि इति चेन्न। एवमपि उपदर्शितहेतुतावच्छेदका

वच्छिन्नविशेष्यकपर्वतविशेषके परामर्शदशायां नीलपर्वतत्वावच्छिन्नविशेष्यकपरामर्शस्यावश्यकत्वात् तादृशहे

तुतावच्छेदकावच्छिन्नविशेष्यकपरामर्शघटितसामग्र्याः प्रतिबंधकत्वाकल्पनेन लाघवस्यानपायात् नत्वपक्ष

मुख्यविशेष्यकपरामर्शस्यैव चेदनुमितिहेतुता तदा उक्तधर्मावच्छिन्नविशेष्यकपर्वतत्वावच्छिन्नविशेषणकपराम

र्शस्यानुमित्यहेतुतया तादृशपरामर्शघटितसामग्र्याः प्रतिबंधकत्वकल्पनमस्माकमपि जागर्तीति वाच्यं पक्षमुख्यवि

शेष्यकपरामर्शस्यैवानुमितिहेतुत्वमित्यत्र तादृशमिश्राणां पक्षस्य इतरांशे लिंगविशिष्टपक्षविशेषणकपरामर्शस्यैवानु

मितिं प्रति हेतुत्वेऽप्यवच्छेदकपरतया लिंगविशे[illegible]ष्यकपक्षविशेषणकपरामर्शस्यानुमितिहेतुत्वेऽविवादात्। अन्यथा पर

मर्शांशे मिश्राणामेवानुमितिल [illegible] परामर्शहेतुतास्वीकारे विरोधापत्तिरिति। आहुः

॥ अ॰ प॰॥

॥१७॥ परामर्शादनुमित्यनुत्पत्तेः। अनाहार्यत्वं अनुमितिकारणतावच्छेदककोटिनिवेशनीयं। आहार्यत्वं च बाधे निरुक्तं। अथाहार्य-
परामर्शादनुमित्युत्पत्तौ का क्षतिरिति चेन्न तथा सति आहार्यतदभावव्याप्यवत्ता[redacted]निर्णयदशायां संशयाकारानुमितिः
स्यात्। बाधबुद्धेरिव तदभावव्याप्यवत्तानिर्णयस्यापि आहार्यस्य विरोधित्वात्। अत एवैककोट्यनुमितिं प्रति अपरकोट्य-
नुमितिसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमिति तदपेक्षया लाघवादनाहार्यपरामर्शत्वेनानुमितिहेतुत्वमेवोचितं नवी
नाहार्यपरामर्शत्वेनानुमितिहेतुत्वे विभिन्नविषयकप्रत्यक्षं प्रति अनन्तानुमितिसामग्र्याः प्रतिबन्धकतायां परामर्शेऽना-
हार्यत्वनिवेशगौरवात्। तदनुमितेर्नदभावानुमितिसामग्र्याः प्रतिबन्धकत्वकल्पनमेवोचितमिति वाच्यम्। भवन्म-
हा तेप्याहार्यतदभावव्याप्यवत्तानिर्णयदशायामनुमित्यनुदयात् भिन्नविषयकप्रत्यक्षादेरनुत्पत्त्या तदुपपत्तये अनन्तभि-
न्नविषयकप्रत्यक्षादिनिरूपिततदनुमितिसामग्रीप्रतिबन्धकतायां तदभावानुमितिसामग्र्यभावविशेष-
स्यापि निवेशनमहागौरवात् तत्तदपेक्षया तत्र तत्र परामर्शांशे अनाहार्यत्वनिवेशस्यैवोचितत्वात्। एवमना-
हार्यपरामर्शत्वेनानुमितिहेतुत्वे वह्न्यभाववान् पर्वत इत्यादिमानसशाब्दबोधादौ वह्न्यादिविषयकपर्व-
तपक्षकानुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पनेनापि लाघवं। तादृशानुमितिसामग्रीकालीनपर्व-
तत्वावच्छिन्नविशेष्यकानाहार्यवह्न्यादिव्याप्यवत्तानिश्चयस्यावश्यकत्वात्। तदभावव्याप्यवत्तानि-
र्णयप्रतिबन्धकतयैवोपपत्तेः। एवं वह्निव्याप्याभाववान् पर्वत इत्यादिमानसशाब्दबोधादौ तथावि-
धानुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पनेनापि लाघवं बाधप्रतिबन्धकतयैवोपपत्तेः। अप्रामाण्यग्रह-
न विशिष्टपरामर्शादनुमित्युत्पत्तिवारणाय अप्रामाण्यग्रहानास्कन्दितपरामर्शत्वेन हेतुता वाच्या। अप्रामाण्यं
च प्रमाभाववद्विशेष्यकत्वा... रत्वरूपप्रमात्वाभाववच्चेति द्वि १९

च्छेतयोश्चानुगतानतिप्रसक्तरूपाभावात्तत्त्वेकमेवाभावाभिवेशनीयाः। न च प्रामाण्यग्रहविरोधि-
त्वेन तयोरनुगमः। अप्रामाण्यव्याप्यवत्ताज्ञानस्याप्यारोपेण तस्यातिप्रसक्तत्वात्। अनुगतविरोधितानिवे-
चेनस्यावश्यकत्वात्। एवं च धर्माभाववद्विशेष्यकत्वावच्छिन्नधर्मप्रकारकत्वव्याप्याभाववद्विशेष्यकत्वा-
वच्छिन्नव्याप्तिप्रकारकत्वादिरूपनानाविधाप्रामाण्यज्ञानानामप्यनुगमकासंभवात् तेषामभावकूट-
एव निवेश्यः। न चाप्रामाण्यग्रहकालेपि समवायसंबन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य
परामर्शेपि सत्त्वात्। अप्रामाण्यग्रहाभावविशिष्टपरामर्शस्त्वीत्यनुमित्यापत्तिरिति वाच्यं। सामानाधि-
करण्यसंबन्धेनैवाप्रामाण्यज्ञानाभावस्य विशेषणत्वात्। अप्रामाण्यग्रहकाले परामर्शे तेन संबन्धेन
तदभावइति केचित्। तन्न। अप्रामाण्यग्रहकालेपि घटावच्छेदेनात्मनि अप्रामाण्यज्ञानाभावस्य सत्त्वे
न परामर्शे सामानाधिकरण्यसंबन्धेनाप्रामाण्यज्ञानाभावस्यावश्यसत्त्वात् अनुमित्यापत्तेः। तस्मात् सामा-
नाधिकरण्यसंबन्धावच्छिन्नप्रतियोगिताकस्याप्रामाण्यग्रहाभावस्य विशेषणताविशेषेण वैशिष्ट्यं नि-
वेशनीयं परामर्शे समवायेन ज्ञानस्य अव्याप्यवृत्तित्वेन तु सामानाधिकरण्येन। अतः स्वसमानाधि-
करणाप्रामाण्यग्रहकाले सामानाधिकरण्यसंबन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभाववैशिष्ट्य-
विरहात्। एतेन स्वसमानाधिकरण्यसंबन्धेनाप्रामाण्यग्रहाभावविशिष्टपरामर्शस्य परामर्शवि-
शिष्टाप्रामाण्यग्रहाभावस्य वा हेतुत्वमिति विनिगमनाविरहो निरस्तः। सामानाधिकरण्येन संब-

ध्यावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य अप्रामाण्यग्रहकालेपि आत्मनि सत्त्वेन परामर्शविशिष्ट
स्य तस्य हेतुत्वेऽप्रामाण्यग्रहकालेप्यनुमित्यापत्तिः। अयं वह्निव्याप्यधूमवानिति परामर्शः अनेतरतद्ग्रो
न प्रमाणं वेति तदन्यधूमपरामर्शनिष्ठतत्त्वादिधर्मितावच्छेदकाप्रामाण्यग्रहदशायां व्याप्यमिकपरामर्शा
दनुमित्यनुदयापत्तिः। तादृशासंबन्धेन तस्याप्रामाण्यग्रहास्कन्दितत्वात्। न च धूमपरामर्शत्वावच्छिन्नवि
शेष्यताकाप्रामाण्यग्रहाभावस्यैव कारणतावच्छेदककोटौ निवेशान्न तादृशाप्रामाण्यग्रहदशायामनु
मितेरनुत्पत्तिरिति वाच्यं। तद्ज्ञानमप्रमेति तत्तादिधर्मितावच्छेदकाप्रामाण्यग्रहकाले तत्राप्यपराम
र्शादनुमित्यापत्तिः। परामर्शत्वावच्छिन्नविशेष्यताकाप्रामाण्यज्ञानाभावविशिष्टपरामर्शसत्त्वादतस्त
थाविधतत्तादिधर्मितावच्छेदकाप्रामाण्यग्रहाभावविशिष्टपरामर्शत्वादिनापि हेतुता वाच्येति चेन्न
परामर्शत्वाद्यवच्छिन्नविशेष्यकानामप्रामाण्यग्रहाणां तादृशानुगतरूपेणैवाभावो निवेश्यतां तत्
तद्व्यक्तित्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहाणां च व्यक्तिसत्त्वे परामर्शसत्त्वेनानुमितिस्तद्व्यक्ति
त्वावच्छिन्नस्तदभावकूटत्वनिवेशनीयद्व्यक्तौ नैनोपपत्तिः। न च तत्तद्व्यक्तित्वावच्छिन्नाभावतत्त
द्व्यक्तिसमानकालीनसंयोगादिव्यक्त्यभावोनानिवेश्यतदृत्यन्तविनिगमनाविरह इति वाच्यं। अ
नन्यगत्या विनिगमनाविरहस्याकिंचित्करत्वात्। ननु पर्वतपरामर्शे इदं ज्ञानमप्रमेति अप्रामा
ण्यज्ञानं ततः परामर्शान्तरं ततोऽनुमित्यापत्तिः। अप्रामाण्यग्रहाभावविशिष्टपरामर्शसत्त्वात् ॥रामा॥ ॥१८॥

नुपप

तादृशाप्रामाण्यज्ञानाभावस्य कारणतावच्छेदककोटौ निवेश आवश्यकः। अन्यथा द्वितीयपरामर्शोत्पत्तिका-
लेऽनुमित्यापत्तिः प्राथमिकपरामर्शसत्वात् न चैवं तादृशातिप्रसंगवारणाय तादृशभेदस्यैव कारणताव-
च्छेदककोटौ निवेश्यते न त्वप्रामाण्यज्ञानासत्ताभावः एवं च तत्कालीनवायुसंयोगात्यंताभावमादा-
य न क्वचिन्निगमनाविरहः। सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकतादृशाभावापेक्षया पराम-
र्शादिभेदस्य लघुत्वादिति वाच्यं। यत्र परामर्शानंतरं इदं ज्ञानमप्रमा पर्वतो वह्निमानित्यनुमितिः तद-
प्रामाण्यविषयिणी तदनंतरं परामर्शांतरोत्पत्तिस्तदानीं पुनरनुमित्यापत्तिवारणाय तदप्रामाण्यग्रहाभाववि-
शिष्टानस्यावश्यकत्वात्तत्परामर्शव्यक्तिभेदनिवेशे प्रागप्यनुमित्यनुदयप्रसंगात् अनुमितौ चेज्ज्ञातोपाधि-
धिरूपप्रतिबंधकसत्वादेव द्वितीयपरामर्शोत्पत्तिकालेऽनुमित्यापत्तिवारणसंभव इति अलमप्रामा-
ण्यग्रहाभावनिवेशेनेति तु न वाच्यं यत्र पक्षतावच्छेदकावच्छेदेन हेतुमत्तावगाहि प्रथमपरामर्शो
तीयक्षणे तत्र प्रथमक्षणोत्पन्ने सामानाधिकरण्यमात्रावगाहि बाधवशात् सामानाधिकरण्यमात्रा-
वगाहिन्येव तादृशपरामर्शाप्रामाण्यविषयिण्यनुमितिर्जाता तत्र तादृशक्षणे बाधनाशात् सामानाधि-
करण्यमात्रावगाहिसिद्धेश्चावच्छेदकावच्छेदेनानुमितावप्रतिबंधकत्वात् द्वितीयपरामर्शोत्पत्तिकाले
पक्षतावच्छेदकावच्छेदेन वह्न्यनुमित्यापत्तिसंभवादिति चेन्न। अनन्यगत्या द्वितीयपरामर्शस्या-
प्रामाण्यज्ञाने उत्तेजकत्वात्तत्परामर्शाभावविशिष्टाप्रामाण्यज्ञानाभावविशिष्टपरामर्शस्य कार-

19

णत्वात्। अथ वा प्रथमपरामर्शनिष्ठसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य का
रणतावच्छेदकत्वं द्वितीयपरामर्शसामानाधिकरण्यसंबंधेनाप्रामाण्यज्ञानव्यक्तिसत्वेपि प्रथमपरामर्शव्य
क्तिनिष्ठसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकतदभावः सुलभ एवेति न द्वितीयपरामर्शा
दनुमित्यनुदय इति। वस्तुतस्तु सामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकत्वेनाभावनिवेशान्नका
प्यनुपपत्तिः। द्वितीयपरामर्शस्य तदप्रामाण्यज्ञानीयविशिष्टविशेष्यता × विशेष्यतया विशेष्यतासंबंधाव
च्छिन्नप्रतियोगिताकतदभावस्य तत्र सौलभ्यात्। चेग्रीयाप्रामाण्यग्रहविषयमेगीपरामर्शादनुमि
त्यनुपपत्तये सामानाधिकरण्यस्य संबंधमध्ये निवेशः विशेष्यताया अप्रामाण्यप्रकारतानिरूपिताया
या तेन प्रथमपरामर्शेऽप्रामाण्यावगाहिद्वितीयपरामर्शसमयसत्वादिनाऽप्रामाण्यग्रहस्य विशेष्यत
यासत्वेपि न तस्मादनुमित्यनुदयापत्तिः। तत्तद्व्यक्तित्वादिव्यमितावच्छेदकेकविध्याप्रामाण्यग्रहाणां तत्
द्दशाप्रामाण्यज्ञानसत्वेनुपदर्शितसंबंधावच्छिन्नप्रतियोगिताकाभावनिवेशे क्षतिविरहात्। तत्त
द्व्यक्तित्वेनाप्रामाण्यग्रहाभावानभिवेशं यतो। अथ यज्ञानत्वावच्छिन्नविशेष्यताकाप्रामाण्यज्ञानदशाया
मनुमितेस्तु पपत्तये अप्रामाण्यप्रकारतानिरूपिततत्तद्व्यक्तित्वावच्छिन्नविशेष्यताकाप्रामाण्य
ग्रहाभावाभिवेशनीयाद इति कथमनुगमः संभवतीति चेन्न तत्तद्व्यक्तित्वानि उभयावृत्तिधर्म
त्वेनानुगमय्य अप्रामाण्यप्रकारतानिरूपितोभयावृत्तिधर्मावच्छिन्नविशेष्यतासंबंधा
वच्छिन्नप्रतियोगिताकाभावनिवेशेनानुगमविरहात्। उभयावृत्तित्वं च स्वस्वप्रतियोगिवृत्ति

त्वं स्वसमानाधिकरणोभयसंबंधेन भेदविशिष्टं यत्तदन्यत्वं उभयवृत्तिधर्माणां तादृशोभयसंबंधेन यत्किंचित्त्वावयवे
दविशिष्टत्वान्निरासः। भेदगर्भव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकोऽभावः। तेन उभयावृत्तिधर्माणामपि तादृशोभय
संबंधेन सार्वत्रिकव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदविशिष्टत्वेपि न क्षतिः। तादृशधर्मनिष्ठविशेष्यतावच्छे
दकतात्वनिरवच्छिन्नात्मालो। अतः प्रमेयत्वादिना तद्व्यक्तित्वादिधर्मितावच्छेदकाप्रामाण्यग्रहनिरासः। धूमवत्परामर्शी
त्वे तद्धूमवत्परामर्शान्यधूमवत्परामर्शत्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहाणां च तादृशधर्मावच्छिन्नविशेष्यता
संबंधावच्छिन्नप्रतियोगिकानां भावाः एवं गोवनिवेश्यां अतस्तादृशधर्माणामुभयवृत्तित्वेपि न क्षतिः। केचित्तु
अप्रामाण्यग्रहाभावस्य परामर्शकारणतायां अवच्छेदकत्वमते अप्रामाण्यग्रहाभावविशिष्टत्वे सति परा
मर्शत्वं परामर्शत्वे सति अप्रामाण्यग्रहाभावविशिष्टत्वं वा कार्यतावच्छेदकमिति विनिगमनाविरहेण कारण
१४ ताबाहुल्यमवच्छेदकगौरवं चेति लाघवादप्रामाण्यग्रहाभावस्य स्वातंत्र्येणानुमितिकारणत्वं अन्यथा सिद्ध्यभावा
दिनामपि परामर्शकारणतावच्छेदकत्वप्रसंगात् अथाप्रामाण्यग्रहाभावस्यानुमितिहेतुत्वे इदं धूमाभाववति
धूमप्रकारकमित्याकारकाप्रामाण्यग्रहदशायामालोकपरामर्शादनुमितिर्न स्यात् प्रतिबंधकस्याप्रामाण्यग्र
हस्य सत्वात् न च धूमपरामर्शजन्यानुमितित्वावच्छिन्नं प्रत्येव धूमाभाववद्विशेष्यकत्वावच्छिन्नधूमप्र
कारकत्वरूपाप्रामाण्यग्रहाभावस्य हेतुत्वान्नायं दोष इति वाच्यं। एवमप्युपदर्शिताप्रामाण्यग्रहदशायां
मालोकोभयसमूहालंबनपरामर्शादनुमितिर्न स्यात् तादृशसमूहालंबनपरामर्शजन्यानुमितेरपि धूमप
रामर्शजन्यतया तादृशाप्रामाण्यग्रहप्रतिबध्यतावच्छेदकाक्रांतत्वादिति। धूमपरामर्शमात्रजन्यानुमिति

अ॰ म॰ ॥२०॥

७०

त्वस्य प्रतिबध्यतावच्छेदकत्वे च तुल्यपुंस्त्वालोकादिपरामर्शीयाप्रामाण्यग्रहस्यापि तल्लिंगकपरामर्शजन्या
नुमितित्वावच्छिन्नं प्रत्येव प्रतिबंधकताया आवश्यकतया उभयलिंगकपरामर्शजन्यानुमितौ कस्यचिद्प्रा
माण्यग्रहस्य प्रतिबंधकतयोभयविधाप्रामाण्यग्रहदशायामपि उभयलिंगकपरामर्शादनुमित्यापत्तेरिति
चेन्न। तदप्रामाण्यग्रहविशिष्टान्यानुमितित्वावच्छिन्नं प्रति तदप्रामाण्यग्रहाभाववत्त्वेन हेतुता। अप्रामाण्यग्र
हविशिष्टत्वं च स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसामानाधिकरण्योभयसंबंधेन। समूहालंबनादिपरामर्शजन्यधर्ममामे
व वह्निविशेष्यकत्वावच्छिन्नधर्मप्रकारकत्वरूपाप्रामाण्यग्रहकालीनानुमितिर्भ्रंशु उभयसंबंधेन तादृशाप्रामाण्यग्र
हविशिष्टेति न तस्यास्तादृशाप्रामाण्यग्रहप्रतिबध्यतावच्छेदकाक्रांतता। न चैवं पक्षधर्ममात्रलिंगकपरामर्शस्तिना
युक्ताप्रामाण्यग्रहसत्त्वे तद्विशिष्टानुमित्यापत्तिः। तस्य तद्विशिष्टान्यानुमितित्वावच्छिन्नं प्रत्येव प्रतिबंधकत्वादि
ति वाच्यं। पक्षमात्रादिपरामर्शस्य तथाविधाप्रामाण्यग्रहाभावसहकारेणैव फले जनकत्वोपगमात्। केवलपक्षमपरामर्श
स्यानुमित्यनापादकत्वात्। अथ सामग्रीविशेषसामग्र्योरेव परस्परसहकारित्वाद् अप्रामाण्यग्रहाभावपरामर्शयो
श्च तथात्वान्न परस्परसहकारिता संभवः। तथाहि तादृशाप्रामाण्यग्रहकालीनसमूहालंबनपरामर्शजन्यानुमि
तेः पक्षमपरामर्शजन्यतावच्छेदकाक्रांततया अप्रामाण्यग्रहाभावजन्यतावच्छेदकस्य तत्साधारण्याभावेन तस्य परामर्शज
न्यतावच्छेदकाव्यापकतया नाप्रामाण्यग्रहाभावस्य परामर्शेन फलजनने सामान्यसामग्रीत्वसंभवः। व्यापकधर्मा
वच्छिन्ने सामग्र्या एव सामान्यसामग्रीपदार्थत्वात्। एवं तादृशाप्रामाण्यग्रहाभावविशिष्टालोकादिमात्रलिंगकानु
मितेरपि तादृशाप्रामाण्यग्रहाभावविशिष्टत्वरूपतादृशाप्रामाण्यग्रहाभावजन्यतावच्छेदकाक्रांततया पक्षमपरा ॥२०॥

मर्शजन्यतावच्छेदकस्य तत्साधारण्याभावेन तस्याप्रामाण्यग्रहाभावरूपजन्यतावच्छेदकाव्यापकत्वात् परामर्शनिष्फलत्व
ननेनाप्रामाण्यग्रहाभावस्य विशेषसामग्रीत्वसंभवो व्याप्यपक्षधर्मावच्छिन्नसामग्र्यादेव विशेषसामग्रीत्वादिति चे
न्नो कार्यतावच्छेदकसामानाधिकरण्यमेव सहकारितापादकं तत्र ननु सामान्यविशेषभावो वीति नानुपपत्तिः।
अस्तु वाऽप्रामाण्यग्रहाभावविशिष्टधूमलिंगकानुमितित्वमेवाप्रामाण्यग्रहाभावजन्यतावच्छेदकं। तथा च विशेष
सामग्रीत्वमेव तस्येति नानुपपत्तिः। अपेतादृशाप्रामाण्यग्रहाभावरूपसहकारिणं विना विशिष्टधूमलिंगकानु
मितित्वरूपस्वीयकार्यतावच्छेदकावच्छिन्नस्य समूहालंबनपरामर्शेन जननोत्सूहालंबनाद्यालोकप
रामर्शोऽपि न कथं तद्विना स्वीयकार्यतावच्छेदकावच्छिन्नं जनयतीति चेन्न यद्यप्रामाण्यग्रहाभावरूपस
हकारिणमन्तर्भाव्य समूहालंबनस्थले धूमालोकानुरोधेन धूमपरामर्शघटितसामग्र्याः फलव्याप्यत्वमु
पपत्तेस्तद्देवोत्पत्तिः संभवति। आपादकीभूतसामग्रीसत्त्वात् तदेव न समूहालंबनस्थले आलोकपराम
र्शघटितसामग्रीतः तद्वत्कालोपपत्तेरर्थवत्त्वादेव चेतादृशफलस्य ज्ञानांतरविशिष्टत्ववत् धूमपरामर्शविशि
ष्टत्वरूपधूमलिंगकस्याप्युपपत्तेः। धूमपरामर्शघटितसामग्रीव्याप्यत्वं तरस्वीकारस्य निष्प्रयोजनकत्वात्
यदि वा तादृशसामग्र्या व्याप्यत्वं तरमपि तदनुरोधमात्रेणैकत्वमपेतेत तदा चालोकपरामर्शतदीयाप्रामाण्यग्रहा
भावादपोऽवश्यं तत्रांतर्भाव्येति नानुपपत्तिरिति साकूतं। तन्न अप्रामाण्यग्रहाभावस्य स्वात तद्घेण हेतुत्वोपग
मेऽपि धूमपरामर्शनिष्ठतद्घटितकार्यतावच्छेदककाप्रामाण्यग्रहदशायां धूमादिपरामर्शतत्कादनु
मितिस्वरूपानुपपत्तेः। न च तत्तद्धूमपरामर्शादिजन्यानुमितौ तत्तद्व्यक्तिधर्मिकाप्रामाण्यग्रहाभावस्य हेतुत्वान्नो
नुपपत्तिरिति वाच्यं। अप्रामाण्यग्रह [illegible] व्यक्तिजन्यानुमितेरेकाव्यसिध्या

आ.प.म
॥२१॥
९१

प्रतिबन्धकतावच्छेदकाप्रसिद्धेः। न च यादृशाप्रामाण्यसत्त्वेऽपीतरकारणसत्त्वे नानुमितिस्तादृशाप्रामाण्यग्रहव्यक्तीनां
व्यक्तित्वेन प्रतिबन्धकत्वोपगमान्नानुपपत्तिः। यत्र च प्रथमधूमपरामर्शद्वितीयक्षणे तत्राप्रामाण्यज्ञानं ततो धू
मपरामर्शान्तरं तत्र द्वितीयपरामर्शाभावविशिष्टप्राथमिकतदप्रामाण्यग्रहव्यक्तेः प्रतिबन्धकत्वमुपगन्तव्यमतो
न द्वितीयपरामर्शादनुमित्यनुपपत्तिरिति वाच्यं। एवमनन्तप्रतिबध्यप्रतिबन्धकभावकल्पनापत्तेर्गौरवतादृ
वस्थायामप्रामाण्यग्रहाभावस्यावच्छेदकत्वमते तु अननुगमस्य दुष्परिहरत्वान्नानुपपत्तिः। यत्तु जनकतासं
बन्धेनानुमितौ स्वसामानाधिकरण्यविशिष्टाप्रामाण्यप्रकारतानिरूपितविशेष्यताविशेषसंबन्धावच्छिन्न
प्रतियोगिताकाप्रामाण्यग्रहाभावस्य हेतुत्वान्नैकविधपरामर्शव्यक्तिधर्मिकाप्रामाण्यग्रहदशायां परा
मर्शान्तरादनुमित्यनुदयप्रसङ्गः। जनकीभूतपरामर्शेऽप्रामाण्यग्रहाभावस्यापेक्षितत्वात्। अत एव तन्मते धू
मपरामर्शत्वादिनैवानुमितिजनकत्वात् अप्रामाण्यग्रहविषयीभूतपरामर्शस्यापि तथात्वमस्त्वमेवेति
तत्रापि तेन संबन्धेनानुमित्युत्पत्त्या व्यभिचारः। न चाप्रामाण्यग्रहविशिष्टान्यत्वस्य कार्यतावच्छेदकत्वान्न
व्यभिचार इति वाच्यं। यतोऽप्रामाण्यग्रहविशिष्टान्यत्वस्य जन्यतावच्छेदकत्वे धूमपरामर्शान्तरधर्मिकाप्रामाण्यग्र
हेऽपरधूमपरामर्शजन्यानुमितेरसंग्रहापत्तिः। अतो विशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकाप्रामाण्य
ग्रहाभावविशिष्टधूमपरामर्शविशिष्टत्वस्यैव कार्यतावच्छेदकत्वमनुपेयं। तथा च तादृशस्यालीकत्वे व्यभिचा
रोद्धुर एव। तादृशानुमितेरपि तथाविधकार्यतावच्छेदकाक्रान्तत्वात्। न वा व्यापकतासंबन्धेनैव कार्यता
वच्छेदकसंबन्धोपगमेनाप्रामाण्यग्रहविषयीभूतधूमपरामर्शस्य च धूमपरामर्शत्वादिरूपेण फलानुपधा

श्री

पकतया न व्यभिचार इति वाच्यं । उपधायकत्वं हि फलाव्यवहितपूर्ववर्तित्वे सति स्वरूपयोग्यतावच्छेदकधर्मवत्त्वं
तच्च अत्र प्रथमपरामर्शद्वितीयक्षणे तत्राप्रामाण्यावगाहिपरामर्शान्तरं तदनन्तरं चानुमितिः । तस्य द्वितीयपरामर्श-
साधारणमेवेति व्यभिचारस्य दुर्वारत्वात् । प्रथमपरामर्शोपि तेन संबन्धेनानुमित्युत्पत्तेः । तत्राप्रामाण्यग्रहाभावस्या-
नुमित्यव्यवहितपूर्वक्षणेऽसत्त्वात् । न च तत्तद्व्यक्तित्वावच्छिन्नतत्तज्जनकमेवोपधायकत्वे तादृशजनकतानां च वि-
वक्षितानवच्छिन्नजनकतात्वेन किंचिद्धर्मावच्छिन्नावच्छेदकताकान्यजनकतात्वे वानुगम इति तेषामनुगतरू-
पेणासंबन्धत्वमुपेयते उपदर्शितस्थले द्वितीयपरामर्शव्यक्तेः । तद्व्यक्तित्वेन हेतुतचैवोपपत्तेः प्रथमपरामर्शव्य-
क्तेः तद्व्यक्तित्वेन हेतुत्वेन जनकत्वेऽप्यन्तेन तत्र तादृशजनकतासंबन्धेन तादृशानुमितिरुत्पद्यत इति । न व्यभिचा-
र इति वाच्यं । परामर्शस्य तद्व्यक्तित्वेन हेतुत्वमप्रामाणिकमिति न तादृशजनकतायाः कार्यतावच्छेदकप्रत्यासत्ति-
त्वे संभवति । न च तत्तद्व्यक्तित्वावच्छिन्ने सामान्यसामग्रीनियम्यत्वेऽन्यदापि तदापत्तिसंभवेन तत्त्वमावश्य-
कमिति वाच्यं । एवमपि वह्निव्याप्यवत्त्वघटव्याप्यवत्त्वोभयविषयकसमूहालम्बनानन्तरं तथाविधसमूहा-
लम्बनात्मकप्रथमपरामर्शे वह्निव्याप्यवत्त्वांशे [illegible]स्मिंश्च घटव्याप्यवत्त्वांशेऽप्रामाण्यावगाहिद्वितीयपरामर्शो-
त्पत्तेस्तदनन्तरं च वह्निघटोभयानुमितिः तत्र व्यभिचारस्य दुर्वारत्वात् । तथाहि तादृशानुमितिव्यक्तौ यदि प्रथमप-
रामर्शस्य तद्व्यक्तित्वेन हेतुता तदा वह्न्यनुमितिं प्रति वह्निव्याप्यवत्ताज्ञानीयाप्रामाण्यज्ञानाभावहेतुतायां व्यभिचारः ।
प्रथमपरामर्शोपधायकतासंबन्धेनानुमित्युत्पत्त्यधिकरणक्षणेऽप्रामाण्यग्रहाभावासत्त्वात् । यदि च द्वि-
तीयपरामर्शस्य तद्व्यक्तित्वेन हेतुता तदा घटव्याप्यवत्ताज्ञानीयाप्रामाण्यग्रहाभावहेतुतायां व्यभिचारः

तिचेन्नैवं। अव्यवहितपूर्वक्षणावच्छेदेनाप्रामाण्यग्रहाभावविशिष्टजनकताया एव कार्यतावच्छेदकत्वात् सन्नित्वाद
न कुत्रापि व्यभिचारः। अनुमित्यव्यवहितपूर्वक्षणावच्छेदेनाप्रामाण्यग्रहविरहभूतप्रथमपरामर्शादेर्जनकतास-
त्त्वेपि तत्राव्यवहितपूर्वक्षणावच्छिन्नायां अप्रामाण्यग्रहाभावाधिकरणतायाः सत्त्वात् द्वितीयक्षण एव प्रथम-
परामर्शेऽप्रामाण्यग्रहोत्पत्तौ स्वोत्पत्तिक्षणावच्छेदेन तत्राप्रामाण्यग्रहाभावाधिकरणतायाः सत्त्वात् व्यभिचारे-
ऽवीरहत्वे त्वन्ते स्वाव्यवहितपूर्वक्षणावच्छिन्नत्वमधिकरणताया विशेषणमिति। अथ जनकतासंबंधेनानु-
मितावप्रामाण्यग्रहाभावहेतुत्वेऽप्रामाण्यग्रहाभावाधिकरणीभूतेऽनुमित्यजनके घटज्ञानादावपि तादृशसं-
बंधेनानुमित्यापत्तिः। अप्रामाण्यग्रहाभावस्य कारणसत्त्वादिति चेत् तद्धूमपरामर्शविशिष्टजनकतासंबंधे-
नानुमितिं प्रति तादात्म्यसंबंधस्यासत्त्वा - - धूमपरामर्शादिनामपि हेतुत्वोपगमात्। नैवं परामर्शस्य कारणताद्वय-
कल्पने गौरवमिति वाच्यं। अप्रामाण्यग्रहाभावविशिष्टपरामर्शत्वेन हेतुत्वमते अप्रामाण्यग्रहाभावानाहा-
र्यत्वनिश्चयत्वादीनां विशेषणविशेष्यभावे विनिगमनाविरहेणानंतकारणताधिक्यप्रसंगात् तदपेक्ष-
या लाघवस्याव्यनपायात्। वस्तुतस्तु तादात्म्यसंबंधेन वपरामर्शस्य हेतुत्वे कल्पते न तु संबंधांतरेणापी-
ति न परामर्शस्य कारणताद्वयकल्पना। न च संबंधांतरेण परामर्शस्य जनकत्वांतरकल्पने जनकतास-
बंधेनानुमितिं प्रति तादात्म्यसंबंधेन परामर्शस्य हेतुत्वमेव न संभवति स्वस्य स्वनिरूपितजनकतायाः
कार्यतावच्छेदकसंबंधतायां आत्माश्रयप्रसंगात् स्वभिन्नजनकतायाश्चाप्रसिद्धेरिति वाच्यं। विशेष-
णतानादिमुद्रया परामर्शस्यानुमितिहेतुतासत्त्वात् तादृशहेतुताया एव धूमादिपरामर्शवृत्तिहेतुता २२

त्वेन तादात्म्यसंबंधावच्छिन्नपरामर्शनिष्ठजनकतानिरूपितजन्यतावच्छेदकधूमासत्तित्वोपगमात्। अप्रामाण्य
ग्रहाभावजन्यत्वोपगमाच्च। अथ जनकतासंबंधेनानुमितिं प्रति अप्रामाण्यग्रहाभावहेतुत्वेऽप्रामाण्यग्रहाभावो वायसंबंधि
ध्यभावादिघटितकालत्वसमवायसंबंधेनात्मन्यनुमित्यापत्तिर्दुर्वारैवेति चेन्न। तदितरसंबंधेन कार्योत्पादकसामग्र्य
धिकरणीभूतक्षणवृत्तित्वविशिष्टघटपटत्वतत्संबंधेन कार्योत्पादकसामग्र्यास्तत्संबंधेन कार्योत्पत्तिव्याप्यत्वाज्जन
कतासंबंधेनानुमित्युत्पादकसामग्री च अन्यकालीनास्मद्भाववादिघटितसामग्रीबलात्समवायसंबंधेनानुमित्या
पत्त्यभावादिति। अत्रेदं चिंत्यते जनकतासंबंधेनानुमितिं प्रति अप्रामाण्यग्रहाभावादीनां हेतुत्वे पुरुषांतरस्याप्य
प्रामाण्यग्रहानास्कंदिततद्धेतौ अप्रामाण्यग्रहानास्कंदितपरामर्शः अन्यथात्मनि सिध्यभावादिघटितसामग्रीब
ः लात्समवायसंबंधेनानुमित्यापत्तिः। जनकतासंबंधेनानुमित्युत्पादकसामग्र्याः पुरुषांतरघटितत्वात्तदानीं सत्त्वा
त्। अतस्तत्पुरुषीयपरामर्शवृत्तिजनकतासंबंधेन तत्पुरुषीयानुमितिं प्रति तादात्म्यसंबंधेन तत्पुरुषीयपरामर्श
त्वेन समवायसंबंधेन तत्पुरुषीयानुमितिं प्रति तादात्म्येन तत्तदात्मत्वेनापि हेतुता वाच्या। एवं च सिध्यभावतद
हात्मादिघटितायाः समवायसंबंधेनानुमित्युत्पादकसामग्र्याः तत्पुरुषीयपरामर्शवृत्तिजनकतासंबंधेनानु
मित्युत्पादकसामग्रीसहितायाः एव समवायेन फलोपधायकत्वमित्युपगमस्य तादृशापत्तिवारणसमर्थत्वा
स्वमते इदंन्यपरामर्शहेतुताशंकाबाहुल्या। अनंतानामात्मनां तत्तदात्मत्वेन हेतुताकल्पनाधिक्यं चेत् अप्रामाण्यग्रहा
भावविशिष्टपरामर्शत्वेन हेतुताकल्पनमेव साधीयः। आलोकादिलिंगकानुमितौ धूमपरामर्शस्य व्यभिचार
वारणाय तत्तल्लिंगकपरामर्शव्यवहितोत्तरक्षणोत्पत्तिकत्वं तत्तल्लिंगकपरामर्शजन्यतावच्छेदके निवेशनीयं।

अपहेतुतावच्छेदकाघटितसाध्याभाववद्वृत्तित्वरूपव्याप्यत्ववगाहिपरामर्शस्यानुमितिहेतुत्वे धूमालोकादिलिंगकमिश्रि
तपरामर्शानां वह्न्यभाववद्वृत्तित्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिर्णयत्वेनानुमा
संभवादव्यभिचाराभावेनाव्यवहितोत्तरत्वनिवेशनं व्यर्थमेवेति चेन्नाद्यकसंबंधावच्छिन्नसाध्याभाववद्वृ
त्तित्वरूपव्याप्यत्ववगाहिनः संबंधांतरेण हेतुप्रकारकनिर्णयादनुमित्यापत्तिवारणाय विशिष्य हेतुतावच्छेदकसंबंधं
निवेश्य साध्याभाववत्संयुक्तत्वावच्छिन्नसंयोगसंबंधावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्य
ताशालिनिर्णयत्वेन हेतुतावाच्या। एवं च साध्याभाववत्समवेतत्वादिरूपव्याप्यत्ववगाहिपरामर्शजन्यानु
मितौ साध्याभाववत्संयुक्तत्वादिरूपव्याप्यत्ववगाहिपरामर्शजन्यानुमितौ साध्याभाववत्संयुक्तत्वादिरूपव्या
प्यत्ववगाहिपरामर्शस्य व्यभिचारवारणाय एतादृशपरामर्शाव्यवहितोत्तरत्वं तादृशपरामर्शजन्यतावच्छेदको
पनिवेशनीयम् अव्यवहितोत्तरत्वं च अव्यवहितत्वे सति उत्तरत्वं। धूमपरामर्शाव्यवहितपूर्वोत्पन्नालो
कादिलिंगकानुमितौ व्यभिचारवारणाय विशेष्यदलं। तदर्थश्च स्वध्वंसाधिकरणत्वं द्वितीयक्षणोत्पन्नानुमि परा
ध्वंस
त्यसंग्रहात्। किंतु स्वाधिकरणसमयपूर्वत्वं निर्विकल्पानामेव क्षणानां चिरविनष्टधूमादिपरामर्शोत्तरतत्पान्यतिलि मर्श
णकानुमितावेव व्यभिचारः इत्यव्यवधानं निवेश्यः। तदर्थश्च स्वनाशाधिकरणसमयानुत्तरत्वं। स्वनाशाधिक
रणसमयध्वंसानधिकरणत्वमिति यावत्। ननु स्वाधिकरणसमयध्वंसानधिकरणसमयानुत्तर
तस्य तृतीयक्षणे साध्यारण्याभावेन तृतीयक्षणोत्पन्नानुमित्यसंग्रहापत्तेः। नोपि स्वाधिकरणसमयोत्त
रसमयोत्तरोयः समयस्तदनुत्तरत्वं। अथ चेक्षणावच्छेदकपरामर्शे चतुर्थक्षणोत्पन्नानुमित्यसंग्रहापत्तेः।

समयांतरमंतरा निवेश्यतत्साधारण्ये च द्वितीयक्षणमात्रावस्थायिपरामर्शाच्चतुर्थक्षणोत्पन्नान्यलिंगकानुमितौ व्यभि
चारप्रसंगात् अथ चिरविनष्टधूमपरामर्शोत्तरक्षणेऽपि तदुत्तरभाविधूमपरामर्शानिरूपिताव्यवधानसत्वात् तादृशक्ष
णोत्पन्नान्यलिंगकानुमितौ व्यभिचारो दुर्वारः एवं तत्तद्धूमपरामर्शाव्यवहितत्वे सति तत्तद्धूमपरामर्शोत्तरोयः क्षण
तदुत्पत्तिकत्वनिवेशो याऽनुगमः। अनंतकार्यकारणभावप्रसंगश्चेति चेन्न। स्वाव्यवहितत्वे सति स्वोत्तरक्षणोय
त्तदुत्पत्तिकत्वसंबंधेन धूमपरामर्शवत्वमेव धूमपरामर्शजन्यतावच्छेदकं। तादृशानुमितिश्च नैतादृशसं
बंधेन धूमपरामर्शविशिष्टा स्वपदे नचिरातीतधूमपरामर्शोपादाने तदव्यवहितत्वस्य भाविधूमपराम
र्शोपादाने तदुत्तरत्वस्य तादृशक्षणोत्पत्तित्वेन स्वपदे एकव्यक्तिमात्रस्य संबंधघटकदलद्वयस्यानुत्तरक्षणो
त्पादाशक्यसंबंधकत्वात् न च स्वपदेन तत्तद्व्यक्तिविवक्षणे अननुगमापत्त्या स्वपदेन धूमपरामर्शसामान्य
मेव विवक्षणीयं तथा च धूमपरामर्शाव्यवहितोत्तरक्षणोत्पत्तिकत्वस्यैव संबंधघटतया तद्व्यक्तिद्वयमादाय दलद्व
यसंगमेनैव तादृशसंबंधेन धूमपरामर्शवत्वमक्षतमेवेति वाच्यं। अव्यवहितोत्तराव्यवधानस्य अव्यवहितोत्त
त्तरत्वस्य च अव्यवहितोत्तरसंबंधघटकतया सामान्यरूपेण निवेशेऽपि एकव्यक्तिनिरूपितदलद्वयघटितत्वस्य
वैशिष्ट्यानिर्वाहात्। अत एव धूमपरामर्शादिस्वपस्वपदार्थनिवेशोऽपि निरर्थकः। तन्निवेशोऽपि अन्यदीया
व्यवधानादिर्नान्यसंबंधघटकस्वोत्पत्तिप्रसंगनिरासाय चेन्न। निवेश्यतां संबंधमध्ये स्वपदार्थः। स्वपदकथनं
अन्यनिरूपितसंबंधादेर्नान्यसंबंधितेति वादेतिरिच्यमायेवेति। अथ यस्य नाशाधिकरणसमयध्वंसा
नधिकरणत्वरूपाव्यवधानेऽपि स्वपदार्थनिवेशनेनाशाधिकरणसमयध्वंसानधिकरणत्वे तदितिप्र

यिवसन्नो। तथा चाप्रसिद्धिः। सर्वेषामेव लक्षणानां किंचिन्नाशाधिकरणसमयवृत्तित्वेन तदनधिकरणत्वाप्रसिद्धेः।
एतदनुरोधेन स्वत्वनिवेशोऽपि निरस्तः। स्वसमय[illegible]स्य स्वपदार्थत्वेऽनौ दोषसंसारः सर्वेषामेव लक्षणानां
पूर्वपूर्वक्षणमत्रपरामर्शस्य नाशाधिकरणसमयनाशाधि[illegible]समयत्वावच्छिन्न* धिकरणतया तदनधिकरण
त्वाप्रसिध्यापत्तेश्च एतादवस्थ्यात्। तत्तद्व्यक्तित्वावच्छिन्नस्य च स्वपदार्थत्वेऽननुगमप्रसंगात्। तत्तद्व्यक्तिनाशा
धिकरणसमयनाशानधिकरणत्वानाम्नेव नाशाधिकरणसमयनाशवत्प्रतियोगिकभेदत्वेन नि
वेशान्नोऽनुगमो न वाऽप्रसिद्धिरिति वाच्यं। एवं सति पचमादिक्षणभेदस्याप्युक्तादृशरूपाक्रान्तत्वेन
६न तादृशभेदाधिकरणीभूतचतुर्थक्षणोत्पन्नानुमितौ व्यभिचारप्रसंगादिति चेन्नैव। नाशाधिकरणस
मयध्वंससानधिकरणत्वमित्यस्य स्वाधिकरणसमयध्वंसवत्त्वसंबन्धावच्छिन्ननाशनिष्ठप्रतियोगिता
काभाववत्त्वमित्यर्थः। तादृशाभावत्वेनागततद्व्यक्तिनाशाभावानामेव निवेशान्नाप्रसिद्धिः। तत्तद्व्य
क्तिनाशाभावत्वेनानिवेशाच्च नाननुगमः। तद्व्यक्तेर्मनिवेशेऽपि व्यक्त्यंतरनाशाभावस्य व्यक्त्यंतरसं वं
बन्धाभावानामतिप्रसंगः। न च तत्तद्व्यक्तिनाशस्येव वृत्तित्वावच्छिन्नाभावादिकमादायातिप्रसंगवारण
यतत्तद्व्यक्तिनाशत्वावच्छिन्नप्रतियोगिताकाभावत्वेन तत्तद्व्यक्तिनिष्ठतत्तद्व्यक्तित्वावच्छिन्नप्रतियो
गिताकाभावत्वेन वा तादृशाभावनिवेशेन मावश्यकमित्यननुगमतादवस्थ्यं। उवीरमेवेद्विवाम
किंचिद्धर्मावच्छिन्नप्रतियोगितावच्छेदकताकान्यत्वेन नाशनिष्ठप्रतियोगितायाविशेषणीयेतया
उभयत्वावच्छिन्नप्रतियोगितायावारणसंभवात्। उभयत्वादिनानविशेषविषयतात्मकस्यतादृशाकि

तादृशीयनाशनिष्ठप्रकारितावच्छिन्नप्रतियोगितावत्त्वनिकेतानां स्वरूपतः रागावच्छेदकत्वात्॥२

त्वपदार्थत्वादिनैव प्रतियोगितावच्छेदकतया तादृशप्रतियोगितानां किंचित्स्वमीवच्छिन्नावच्छेदकताकान्यत्वविरहा
त्। एवमन्यत्रापि सिद्धित्वावच्छिन्नाभाववारणं क्रोधध्वंसधूमादिपरामर्शस्य ममिपतत्समयविनष्टतत्पूर्वीवस्यापि
स्थूलकालोपाधिनाममपि उपदर्शितान्यवहितोत्तरत्वाक्रान्ततया तदुत्पन्नधूमपरामर्शप्राक्कालीनान्यलिंगका
नुमितौ व्यभिचारवारणाय पक्षेति। अयं पक्षेण त्वं स्वजन्यविभागप्रागभावावच्छिन्नकर्मत्वो स्वस्वध्वंसवर्त्तिपाव
त्पदार्थविशिष्टत्वं वा तत्र स्वपदं तद्घटकीयरा कर्मसामान्यस्य स्वपदार्थत्वे आद्ये अन्यकर्मजन्यविभागप्रागभा
वविशिष्टस्य कर्मणः क्षणचतुष्टयस्थायितया धूमपरामर्शप्राक्कालीनान्यलिंगकानुमितौ व्यभिचारप्रसंगात्
अन्त्ये कर्मान्तरवृत्तिचिरविनष्टपदार्थानामपि तथाविध्यापावत्पदार्थत्वेन तया तादृशयावत्पदार्थविशिष्टाप्रसि
द्धेः। एवं च यन्नाग्गमप्रसंगद्वतिचेन्न। स्वप्रतियोगिजनकत्वसंबन्धेन विभागप्रागभावविशिष्टत्वमेव क्षणत्वं। स्व
पदं च परिचायकमात्रं न तु स्वपदार्थस्य संबन्धमध्ये निवेशः। अन्यप्रतियोगिकेऽजनकत्वस्यापि कर्मान्यसंबन्धत्वा
भावात्। अन्यदीयकर्मजन्यविभागप्रागभावमादाय न दोषः। अथवा स्वप्रतियोगिमत्त्वसंबन्धावच्छिन्नप्र
तियोगिताकनाशाभावविशिष्टत्वं यदार्थतरसाक्षात्कारणं क्षणत्वं न चैवं द्वितीयक्षणावच्छेदेन कर्मादौ नातादृश
नाशाभावविशिष्टत्वं जातिक्षणकस्यापि विद्धिनाशाद्वतिभियमेनद्वितीयक्षणोऽवश्यं कस्यचिद्विनाशात्। तादृश
पदार्थस्य आद्यक्षणावच्छेदेन स्ववृत्तितया स्वप्रतियोगिमत्त्वसंबन्धेन तन्नाशवैशिष्ट्यस्य द्वितीयक्षणा
सत्त्वेन तदभावासत्त्वात्। न च द्वितीयक्षणे नाशस्य सत्त्वेऽपि संबन्धघटकप्रतियोगिनोरभावात् तद्घटितसंब
न्धनाशाभाववत्त्वमक्षतमेवेति वाच्यं। प्रतियोगिन उपलक्षणविधयैव संबन्धघटकत्वात्। तदसत्त्वेऽपिक्ष
तिविरहात्। अत एवमपि परामर्शपूर्वकालोत्पन्नोत्पत्तिसमयविनष्टकर्मा धूमपरामर्शप्राक्कालीनान्यलिंगका

नुमितौ व्यभिचारोद्धारित्ववत् तत्रापि स्वाव्यवहितोत्तरं यत् तादृशप्रागभावविशिष्टनाशाभाववैशिष्ट्यं वा कर्मत्वं तदुत्पत्ति
कत्वमेव स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वमित्यस्यार्थः। तथा च तादृशानुमितावक्षतमेव तदुत्पत्त्यधिकरणीभूततोपदर्शितकर्म
णः तत्परामर्शाव्यवहितोत्तरत्वात्। स्वाश्रयक्षणावच्छेदेन तादृशप्रागभावविशिष्टत्वेऽपीति चेन्न। तादृशप्रागभावादिवैशिष्ट्या
वच्छेदेन स्वाधिकरणसमयध्वंसवत्त्वेऽपि स्वस्योत्तरत्वस्य हि विशेषणीयतयोपदर्शितकर्मणश्च परामर्शस्य चैवमेवस्ता
दृशप्रागभावादिवैशिष्ट्यसत्त्वेन तदवच्छेदेन तादृशपरामर्शाधिकरणसमयध्वंसाधिकरणत्वेनास्यैवेष्टदोषात्
न चैवं परामर्शानन्तरं जायमानस्यैव कर्मणस्तादृशप्रागभावादिवैशिष्ट्यावच्छेदेन तत्परामर्शाधिकरणस
मयध्वंसवत्त्वात् तस्य तत्परामर्शनाशाधिकरणतृतीयक्षणध्वंसाधिकरणेनाव्यवहितत्वाभावात्। तादृश
प्रागभावादिवैशिष्ट्यावच्छेदेन तत्परामर्शाधिकरणध्वंसवत्त्वेऽव्यवहितत्वाश्रयकर्मणस्तादृशप्रसिद्धिरिति वा
च्यम्। स्वनाशाधिकरणसमयध्वंसानधिकरणत्वमित्यस्य स्वनाशाधिकरणसमयध्वंसवत्त्वसंबन्धावच्छि
न्नप्रतियोगिताकस्वनाशाभावविशिष्टात्मकतया परामर्शोत्तरोत्तरोत्पन्नस्य कर्मणः परामर्शचतुर्थक्षणा नं० १
वच्छेदेन तत्परामर्शनाशस्योपदर्शितसंबन्धेन वैशिष्ट्यसत्त्वेऽपि द्वितीयतृतीयक्षणावच्छेदेन तादृशना
शाभावस्य वैशिष्ट्यस्याक्षततत्त्वेनानुपपत्त्यभावात्। न चैवं परामर्शादिचतुर्थक्षणोत्पन्नान्यलिंगकानुमि
तौ व्यभिचारोद्धारित्ववत्तादृशानुमितेरपि परामर्शद्वितीयतृतीयक्षणोत्पन्नस्य कर्मणस्तादृशप्रागभावादिवै
शिष्ट्यावच्छेदेन परामर्शाधिकरणसमयध्वंसवत्त्वात्। तादृशकर्मणश्च तत्परामर्शद्वितीयतृतीयक्षणावच्छे
देनोपदर्शितसंबन्धावच्छिन्नप्रतियोगिताकनाशाभावविशिष्टत्वादिति वाच्यम्। उपदर्शितसंबन्धावच्छि
न्नप्रतियोगिताकनाशाभावविशिष्टत्वावच्छेदेन तादृशप्रागभावादिविशिष्टत्वावच्छेदेन वा तदुत्पत्तिका २५

निवेशान्न तादृशपरामर्शनाशोत्तरक्षणावच्छेदेन तथाविधकर्मत्वेनानुमितेर्व्यभिचाराभावात् वह्निव्याप्यधूमवान् वह्निमांश्च
पर्वत इत्याकारकसमूहालंबनात्मकान्यलिंगकानुमितेर्धूमपरामर्शजन्यवह्नितोत्तरक्षणवर्तिन्यां व्यभिचारवारणाय
तत्पर्यन्तनिवेशनं। न चैतस्याधिकरणसमयप्रागभाववत्त्वविशिष्टकालिकविशेषणतासंबंधेन तादृशक्षणवृत्तित्वेनैव तादृशानु
मितेर्व्यभिचारवारणं संभवति। तादृशानुमितेः कालिकविशेषणतया स्वात्मकधूमपरामर्शजन्यवह्नितोत्तरक्षणवृत्ति
त्वेपि तादृशक्षणस्य तदधिकरणसमयप्रागभाववत्त्वाभावेन स्वाधिकरणसमयप्रागभाववत्त्वविशिष्टकालिकविशेषण
तया तद्वृत्तेरिति वाच्यं। एवमप्येतस्यानुव्यवसायात्मकतादृशसमूहालंबनेनानुमितेर्व्यभिचारस्य दुर्वारत्वात्। तत्तीयक्ष
णस्यापि तदधिकरणतया स्वाधिकरणसमयप्रागभाववत्त्वसंबंधेन तस्य वह्नितीयक्षणेऽपि तादृशक्षणस्यापि वृत्तिकत्वसत्त्वात् तत्र
धिकरणसमयध्वंसानधिकरणतादृशक्षणवृत्तित्वं। तत्र स्वपदस्यानुमितिसामान्यपरत्वे सर्वेषामेव क्षणानां पूर्ववर्ति
त्वेनानुमित्यधिकरणसमयध्वंसाधिकरणतया तादृशध्वंसानधिकरणक्षणाप्रसिद्धिरिति तत्तद्व्यक्तिरेव स्वपदार्थो
वाच्यः तथा चाननुगम इति चेन्न। स्वाधिकरणसमयध्वंसवत्त्वावच्छिन्नस्वनिष्ठप्रतियोगिताकाभाववत्त्वावच्छिन्न
कालिकविशेषणतासंबंधेन तद्वृत्तिकत्वमेव तदुत्पत्तिकत्वं द्वितीयादिक्षणे तादृशसंबंधेन तस्याभावासत्त्वान्नाति
प्रसंगः। वस्तुतस्तु स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वं नु संबंधोपेनेक्षणत्वादिनिवेशेनाननुगमः स्यादपि त्वनुमितिस्वा
व्यवहितोत्तरत्वमेव संबंधः। तत्राव्यवहितत्वं स्ववृत्तिप्रागभावप्रतियोगित्वसंबंधावच्छिन्नस्वनाशनिष्ठ
प्रतियोगिताकाभाववत्त्वं ग्राह्यं। तदुत्तरत्वं च स्ववृत्तिप्रागभावप्रतियोगित्वं। स्ववृत्तित्वं च कालिकविशेषणतासंबंधे
न। धूमपरामर्शादिद्वैतीयकानुत्पन्ने तत्समये उत्पत्तिकाचानुमितिर्न तद्वृत्तिप्रागभावप्रतियोगिनी इत्यनुमितिप्रागभावस्य

तत्परामर्शासमानकालीनतया — तित्वादिति। त्वासमानकालीनस्य चाधाराधेयभावविरहादिति अथ यत्र धूमपरामर्शद्वितीयक्षणे
धूमज्ञानाप्रामाण्यग्रह आलोकपरामर्शस्तु तत्र चानुमितिः। तादृशानुमितौ अप्रामाण्यग्रहाभावविशिष्टधूमपरामर्शस्य प्राग
भावसत्त्वेन व्यभिचारः। न चाप्रामाण्यग्रहाभावविशिष्टधूमपरामर्शाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकताघटकसंबंध
त्वोपगमात् न तत्र व्यभिचार इति वाच्यं। तादृशपरामर्शस्याऽसत्त्वक्षणावच्छेदेनाप्रामाण्यग्रहाभावविशिष्टतया तदव्यवहि
तोत्तरत्वस्य च तादृशानुमितावक्षतत्वेन व्यभिचारवारणासंभवात्। न चाव्यवहितोत्तरत्वसंबंधेनाप्रामाण्यग्रहवि
शिष्टान्यत्वस्य कार्यतावच्छेदकत्वेन ग्रहणीयतया न तत्र व्यभिचार इति वाच्यं। तथा सति प्रथमपरामर्शनिष्ठद्वित्वधर्मिका
वच्छेदकाप्रामाण्यग्रहानंतरोत्पन्नधूमपरामर्शीतरजन्यानुमितेरसंग्रह इति चेत् सत्यं। अव्यवहितोत्तरक्षणोत्पत्तिक
त्वसंबंधेनाव्यवहितोत्तरत्वसंबंधेन वाऽप्रामाण्यग्रहाभावविशिष्टपरामर्शाधिकरणविशिष्टत्वमेवाप्रामाण्यग्र
हाभावविशिष्टपरामर्शजन्यतावच्छेदकं। अव्यवहितोत्तरत्वं च द्वितीयक्षणमात्रसाधारणं स्वध्वंसोत्पत्त्यधिकरण
त्वं। अनुमितौ च द्वितीयक्षणोत्पन्नानुमितिसाधारणं स्ववृत्तिप्रागभावप्रतियोगित्वसंबंधावच्छिन्नप्रतियोगिता
कस्वनाशाभाववत्त्वे सति स्ववृत्तिप्रागभावप्रतियोगित्वमेव विनश्यदवस्थपरामर्शजन्यानुमितौ च परामर्शाधि
करणद्वितीयक्षणवैशिष्ट्यं तादृशसंबंधेन वर्तत इति न तदसंग्रहः। उक्तस्थले चाप्रामाण्यग्रहाभावविशिष्टपरामर्शाधि
करणमुत्पत्तिक्षणाद्वितीयक्षणविशिष्टनिरूपितविलक्षणाधिकरणत्वविरहात् तदव्यवहितोत्तरत्वं च न तृतीय
क्षणोत्पन्नानुमितेः तादृशानुमिते स्ववृत्तिप्रागभावप्रतियोगित्वसंबंधावच्छिन्नप्रतियोगिताकतत्क्षणनाशा
भावविरहादिति न व्यभिचारः। अथ विशिष्टनिरूपितविलक्षणाधिकरणतापि विशिष्टनिरूपितविलक्षणा
धिकरणत्वेन चेन्निवेशस्तदा शुद्धविशेष्याधिकरणताया व्यावृत्तेर्न संभवति शुद्धविशेष्यस्य विशिष्टानतिरेकि २६

त्वादिति चेन्न। अप्रामाण्यग्रहाभाववद्रूपविशेषणावच्छिन्ननिरूपकताकाधिकरणतात्वेनैव तन्निवेशः। अनुपविशेष्यताधि
करणतानिरूपकत्वं च न तादृशविशेषणावच्छिन्न अतो नातिप्रसंगः। क्षणत्वं चाल्पक्षणावच्छिन्नक्रियावृत्तिजनकतासंबं
धेन स्वध्वंसविशिष्टकर्मत्वं स्वप्रतियोगिमत्त्वसंबंधावच्छिन्नप्रतियोगिताकप्रागभावविशिष्टकर्मत्वं वा अंत्यक्षणावच्छिन्न
पदार्थवृत्तितादृशाभावाभावविशिष्टत्वं वा। नन्वाद्यक्षणावच्छिन्नक्रियावृत्तिनिरुक्तक्षणत्वं तथा सति धूमपरामर्शा
च्चतुर्थादिक्षणोत्पन्नान्यलिंगकानुमितौ व्यभिचारस्य दुर्वारत्वात्। तादृशानुमितावपि धूमपरामर्शोत्पत्तिकाद्यक्षणा
वच्छिन्नकर्मत्वकतदधिकरणक्षणनिरूपितनिरुक्ताव्यवहितोत्तरत्वसत्त्वात् तद्दोषमन्यत्र वैदिशानस्य पमितिता अ
थवा स्वाव्यवहितपूर्वक्षणावच्छेदेनाप्रामाण्यग्रहाभावविशिष्टधूमपरामर्शवत्त्वविशिष्टसमवायस्य कार्यतावच्छे
दकसंबंधः कार्यतावच्छेदकं त्वनुमितित्वमेव। उपदर्शितस्थले चैतादृशसंबंधेनानुमितिनिरूपपत्ता तदव्यव
हितपूर्वक्षणे अप्रामाण्यग्रहोत्पत्त्या तदवच्छेदेनाप्रामाण्यग्रहाभावविशिष्टस्य धूमपरामर्शस्याभावादिति न व्यभि
चारः। स्वाव्यवहितपूर्वत्वं च स्वाधिकरणसमयध्वंससंबंधावच्छिन्नप्रतियोगिताकस्वप्रागभाववत्त्वे सति स्वप्रागभा वाभा
प्रागभा वा प्रागभाववत्त्वं। क्षणत्वं च पूर्वनिरुक्तमेव। केचित्तु स्ववृत्तित्वे सति स्ववृत्तिप्रागभावप्रतियोगित्वमेव स्वाव्य
वहितोत्तरत्वं अनुमितिनिष्ठः परामर्शस्य संबंधः। परामर्शोत्पत्तिक्षणोत्पत्तिकाद्वितीयक्षणोत्पत्तिका चेत्कृतिः।
कालिकसंबंधेन परामर्शवृत्तिः। परामर्शाद्वितीयक्षणोत्पन्नानुमितौ च कालिकसंबंधेन तदुभयविषयकृतिस
त्त्वात् तृतीयक्षणोत्पन्नानुमितौ च तेन संबंधेन द्वितीयक्षणोत्पन्नकृतिमत्त्वमित्युभयसंगतिः। न च प्रथमेक्षा
बुध्यात्मकपरामर्शचतुर्थक्षणोत्पन्नानुमितेः। तृतीयक्षणोत्पन्नकृतिमादायसंग्रहः। परामर्शनाशा
नंतरोत्पन्नान्यलिंगकानुमितौ न तद्वृत्तिकृतिमत्त्वं कृतेः द्विक्षणमात्रस्थायित्वात्। परामर्शवृत्तिकृतेस्तन्नाशो

त्तरमसत्वात्. अन्यलिंगकपरामर्शजन्यायावृत्तिव्याप्यधूमादिविषयकानुमितित्वद्वारणाय स्वव्यक्तिप्रागभावप्रतियो-
गित्वनिवेशः। न च स्ववृत्तिकृतिमत्त्वं स्ववृत्तिज्ञानादिमत्त्वं वा निवेश्यत इत्यत्र विनिगमनाविरह इति वाच्यं। अपेक्षाबुद्ध्या-
लिंगकपरामर्शस्य त्रिक्षणस्थायित्वपक्षे तृतीयक्षणोत्पन्नापेक्षाबुद्धिमादाय चतुर्थक्षणोत्पन्नानुमितिसाधारण्य-
प्रसंगेन तेन निवेशासंभवात्॥ +परामर्श+ न चैवं सुखादिनिवेशमादाय विनिगमनाविरह इति वाच्यं। सुखादि-
निवेशे यादृशपरामर्शकाले केचिदपि सुखं नोत्पन्नं तादृशपरामर्शजन्यानुमितेरसंग्रहप्रसंगात्. न हि सर्वदा सुखोत्पा-
दमानमस्ति। न च कृतिनिवेशे [illegible] इति वाच्यं। अंततो जीवनयोनिकृतेरेव परामर्शक्षणेऽनुत्पादस्या-
वश्यं संभवात्। न चैतत्पक्षे यत्र परामर्शोत्तरं तदप्रामाण्यग्रहादि आलोकपरामर्शस्तदुत्तरानुमितौऽप्रामाण्यग्रहस-
मानकालविशिष्टधूमपरामर्शस्य व्यभिचारो दुर्वार इति वाच्यं। अप्रामाण्यग्रहाभावविशिष्टत्वादिनैव स्ववृत्तित्वे स्वकृतेर्निवेशनीयतया ता-
दृशस्थले धूमपरामर्शक्षणवृत्तिकृतेरप्रामाण्यग्रहाभावविशिष्टत्वावच्छेदेन धूमपरामर्शावृत्तित्वात् तत्तृतीयक्षणोत्प-
न्नानुमितौ च तादृशकृतिमत्त्वाभावेन व्यभिचारानवकाशात्. विशेषणवैशिष्ट्यावच्छिन्ननिरूपितापर्याप्त्यविशेषव-
त्तिनिरूपितविलक्षणपर्याप्तेर्मानाभाव इति तु नाशंकनीयं। तादृशविलक्षणपर्याप्त्यनुपगमे ध्वंसप्रागभावयोः प्र-
तियोग्यधिकरणक्षणावृत्तित्वव्यवहारप्रसंगात्. प्रतियोग्यधिकरणीभूतविभागप्रागभावादिविशिष्टकर्मात्मकक्षणाव-
पूर्वापरकालावच्छेदेन तयोर्वृत्तेर्विलक्षणत्वोपगमे च विभागप्रागभावादिवैशिष्ट्यावच्छेदेन प्रतियोग्यधिकरणीभूतक्ष-
णे तदवच्छेदेन ध्वंसप्रागभावयोर्वृत्तेर्नातिप्रसंग इति दिक्। [illegible] व्यवहितोत्तरत्वस्य कार्यतावच्छेदककोटिप्रवेशेऽपि
पुरस्तान्तरे धूमपरामर्शाव्यवहितोत्तरं जायमानान्यलिंगकानुमितौ व्यभिचारो दुर्वार एव कार्याव्यवहितपूर्वक्षणा-
वच्छेदेन कार्याधिकरणकारणासत्त्वात् धूमपरामर्शादिसामानाधिकरण्यस्य तज्जन्यतावच्छेदककोटिनिवेशेऽपि

न निस्तारः। निर्विकल्पानामनुमितीनामेव कालान्तरीयधूमपरामर्शसमानाधिकरणत्वात्। स्वसमानाधिकरणधूमादिपरा-
परामर्शाव्यवहितोत्तरत्वनिवेशेपि स्वपदस्य तत्तदनुमितिपरतयाऽननुगम इति चेन्न। सामानाधिकरण्यघटकाव्यवहितो-
त्तरत्वसंबन्धेन धूमादिपरामर्शवत्त्वस्यैव धूमादिपरामर्शजन्यतावच्छेदकमुपेयते। पुरुषान्तरीयधूमपरामर्शाव्यवहितोत्तर-
क्षणोत्पन्नास्मत्पुरुषीयधूमपरामर्शसमानाधिकरणत्वपि तु मयसंबन्धेन किंचिद्धूमपरामर्शादिमत्त्वमिति न व्यभिचा-
र इति संक्षेपः। अन्ये तु अन्यलिंगकव्यावृत्तो जातिविशेष एव धूमपरामर्शजन्यतावच्छेदकः। उभयलिंगकानुमितौ तत्त-
वैजात्ये उभयलिंगकपरामर्शजन्यतावच्छेदकमुपेयते। न तु प्रत्येकपरामर्शजन्यतावच्छेदकानां नानाजातय इति न धूमप-
रामर्शजन्यतावच्छेदकजात्या संकरः। न चोभयपरामर्शजन्यतावच्छेदकवैजात्यावच्छिन्नोत्पत्तिकाले प्रत्येकपरामर्श-
जन्यतावच्छेदकावच्छिन्नोत्पत्तिस्तदवच्छिन्नोत्पादकसामग्र्या व्यापकत्वादिति वाच्यं। तन्मात्रलिंगकानुमितिं प्रति
तदन्यलिंगकपरामर्शस्य प्रतिबन्धकत्वोपगमादित्याहुः। तदसत्। वैजात्यकल्पनापेक्षया गौरवादिति। परे तु अन्यलिंगका-
नुमितिव्यावृत्तो विधेयताविशेष एव धूमादिपरामर्शजन्यतावच्छेदक उपेयते। उभयादिलिंगकानुमितौ च उभयविधे-
यतोपेयते। तत्र संकरस्यादोषत्वादिति। तन्न। धूमालोकादिलिंगकानुमितिषु परस्परव्यावृत्तानां विलक्षणविधेयता-
नामुपलंभबाधेन कल्पयितुमशक्यत्वात्। कार्यतावच्छेदकतया विलक्षणविधेयतास्वीकारेऽपसिद्धान्तात्। कारणता-
वच्छेदकतया निर्विकल्पपरामर्शेपि विलक्षणविषयतासिद्धिप्रसंगाच्चेति तस्मादव्यवहितोत्तरत्वनिवेश एव साधी-
य इति। अव्यवहितोत्तरत्वनिवेशे च अनुमितिविषयीभूतपक्षसाध्यादिविषयता न कार्यतावच्छेदककोटौ निवे-
श्यते। प्रयोजनाभावात्। न च विषयताऽनिवेशे वह्निव्याप्यधूमवान् पर्वत इत्येतादृशसमूहालंबनकालेप

ईतो वह्न्यभाववानित्यत्र तादृशबाधकालेऽप्यनुमित्यापत्तिः। तादृशपरामर्शविशिष्टत्वस्य तथा बाधाभावजन्यतावच्छेदकेन स
मव्याप्यव्यापकत्वविरहेण तादृशपरामर्शेण कल्प्तत्वे तादृशबाधाभावस्य सामान्यसामग्रीत्वाभावेन विशेषसामग्री
त्वाभावेन च सहकारित्वासंभव इति वाच्यं। सामान्यविशेषाभावविरहेऽपि सहकारितया ज्ञाने व्यवस्थापितत्वात्। न च वि
षयतायाः परामर्शजन्यतावच्छेदके निवेशे वह्निव्याप्यवत्तापरामर्शाद्वह्न्यनुमितिरेवोत्पद्यते न तु द्रव्यत्वानुमितिरित्यत्र नियाम
काभाव इति वाच्यं। वह्निव्याप्यवत्तानिर्णयजन्यतावच्छेदके वह्निविषयतायाः निवेशेऽपि तद्घटितसामग्र्या वह्निविधे
98 ताकानुमितित्वावच्छिन्नं प्रत्येव व्याप्यत्वोपगमात्। तादृशसामग्रीतो वह्नित्वाद्यवच्छिन्नविषयताशाल्यनुमितिरेवो
त्पद्यते न च तत्स्य धर्मावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नघटिता या सामग्र्यास्तद्धर्मावच्छि
कृत्वा त्पादनियमात्। वह्न्यादिव्याप्यवत्तापरामर्शजन्यतावच्छेदके वह्न्यादिविषयकत्वानिवेशे कथं तदवच्छिन्नोत्पादनिया
मकत्वमिति वाच्यं। परामर्शजन्यतावच्छेदककोटौ वह्न्यादिविषयकत्वानिवेशेऽपि तादृशसामग्रीघटकसिध्य
भावजन्यतावच्छेदके तन्निवेशेनैव तादृशसामग्र्या वह्न्यादिविषयकत्वावच्छिन्नोत्पादनियामकत्वसंभवात्।
अथ सिध्यभावजन्यतावच्छेदककोटौ सिध्यनुत्तर त्वनिवेशस्यावश्यकतया शीघ्रतया व्यभिचाराभावेन तत्र
पि विषयविशेषनिवेशस्यानावश्यकतया एतदनुरोधमात्रेण तन्निवेशपरामर्शजन्यतावच्छेदके एव तन्निवेशन
मुचितं न तु सिध्यभावजन्यतावच्छेदके परामर्शजन्यतावच्छेदकापेक्षया नानाविधेच्छाविरहकूटघटितस्य सिध्य
भावजन्यतावच्छेदकधर्मस्य गुरुत्वात्। न च लिङ्गभेदेन परामर्शहेतुताबाहुल्यात् अनंतकार्यकारणभावे विषयनि
वेशापेक्षया सिध्यभावजन्यतावच्छेदके एव तन्निवेशनमुचितमिति वाच्यं। तत्तल्लिङ्गकेच्छानां प्रत्युत्तेजकत्वा

नुरोधे नास्ति व्यभावस्यापि लिंगभेदेन हेतुता वा कृत्व्यस्यावश्यकत्वादिति चेन्न एवं सति वह्न्यादिविषयकानुमितित्वावछिन्नं प्रति
सामान्यतो ज्ञानत्वेनात्मत्वेन वातिरिक्तमेकैककारणत्वकल्पने लिंगभेदेनानंतपरामर्शनिष्ठजनकतानिरूपितजन्यताव
छेदके विषयनिवेशावश्यकत्वे तत्कल्पनागौरवापत्तेः एवं च तादृशकारणतावछेदकावछिन्नस्याप्यपदर्शितसामग्रीघ
टकतया तादृशसामग्र्या वह्न्यादिविषयकानुमितित्वावछिन्नं प्रति जनकत्वसंभवादिति। अन्यथा वह्नितो तत्रत्यनिवेशितेप्यनुमि
१८ तिनिवेशनमावश्यकमेव। अन्यथा परामर्शाव्यवहितो तत्क्षणोत्पन्नसंयोगादिहेत्वादेरपि स्वाव्यवहितोत्तरोत्पत्तिकत्वसं
सामानाधिकरण्योभयसंबन्धेन परामर्शविशिष्टत्वरूपपरामर्शजन्यतावछेदकाक्रांततया घटादेरपि तदुत्पत्त्याधिकरण २६
यातत्र परामर्शाभावेन व्यभिचारप्रसंगात्। यदि च कार्यतावछेदकविशिष्टाधिकरणे कारणाभावरूपव्यभिचारः। ननु कार्य
तावछेदकोपलक्षिताधिकरणत्वस्य व्यभिचारः। एवं च विशेषणीभूतपरामर्शानधिकरणघटादौ कार्यतावछेदकी
भूतपरामर्शविशिष्टाधिकरणताया अव्यभिचार इति विभाव्यते तदानुमितित्वं न निवेश्यमिति। यत्र वह्निव्याप्यधूम
ज्ञानं घटादिव्याप्यवत्ताज्ञानं च इदं ज्ञानं धूमाभाववति धूमप्रकारकमिति अप्रामाण्यज्ञानं च तदनंतरं घटानुमितिस्तदुत्तर
वह्न्यनुमितिवारणाय अप्रामाण्यज्ञानाभावो वह्न्यनुमितिजनकतावछेदककुक्षौ निवेशनीयः। एवं च तादृशाप्रामाण्यज्ञान
स्याभावघटितकारणतावछेदकावछिन्नस्य तादृशघटानुमितौ व्यभिचारवारणाय कार्यतावछेदके विषयविशेषोवश्य
निवेशनीयः। अन्यथा कार्यतावछेदककोटिनिविष्टपरामर्शेतरप्रामाण्यग्रहस्याप्यभावस्य निवेशनीयतया गौरवप्रसं
गात्। एवमप्रामाण्यज्ञानास्कंदितवह्निव्याप्यवत्ताज्ञानकाले वह्न्यादिविषयकप्रत्यक्षोत्पादे व्यभिचारवारणायानुमितित्व
निवेशनमावश्यकं। अन्यथा कार्यतावछेदककोटिनिविष्टपरामर्शेतरदप्रामाण्यग्रहाभावस्य निवेशनीयतया गौरवादिति।

तदसत्ता। अप्रामाण्यज्ञानानामनुगतरूपेणाभावनिवेशस्याव्यावश्यकत्वात्। विषयाद्यनिवेशेपि कार्यतावच्छेदकप्रविष्टपरामर्शत्वपर्यवसि-
ताप्रामाण्यग्रहाभावनिवेशेप्याधिक्यविरहादिति संक्षेपः। वह्निव्याप्यधूमवान् पर्वत इत्याकारकपक्षविशेष्यकपरामर्शस्ये-
व वह्निव्याप्यधूमः पर्वते इत्याकारकव्याप्यविशेष्यकपरामर्शस्यापि अनुमित्युत्पादके तथा तादृशपरामर्शस्यापि स्वीयतद्वि-
शिष्टानुमितित्वावच्छिन्नं प्रति पृथक्कारणत्वं कल्पनीयं वैशिष्ट्यस्य निवेशादेव पक्षविशेष्यकपरामर्शजन्यानुमितेन व्य-
भिचारः॥ केचित्तु व्याप्यविशेष्यकपक्षविशेष्यकपरामर्शयोः पर्वतवह्निव्याप्यधूमवैशिष्ट्यावगाहित्वैकत्वरूपानुगत-
रूपेणैक्यकारणता कल्प्यते नतु पृथक् [illegible]। पर्वतवह्निव्याप्यधूमवैशिष्ट्यावगाहित्वञ्च पर्वतविषयतानिरू-
पितवह्निव्याप्यधूमविषयताशालित्वं वह्निव्याप्यविशेष्यकपक्षविशेष्यकोभयपरामर्शसाधारणमेव। अथोभयपरामर्शस्य-
करूपेण हेतुत्वे धूमाभाववति धूमप्रकारकपर्वताभाववति पर्वतप्रकारकमिदमित्याकारकयोर्द्वयोरप्रामाण्यज्ञानयोरभाव-
स्यैकत्र निवेशे धूमप्रकारकत्वघटिताप्रामाण्यग्रहदशायां धूमविशेष्यकपरामर्शात्तत्परामर्शेपि पर्वतप्रकारकत्व-
घटिताप्रामाण्यग्रहदशायां पर्वतविशेष्यकपरामर्शादनुमित्यनुत्पत्तिप्रसंगः। न चाप्रामाण्यग्रहाभावस्य परामर्शनिष्ठकारण-
तायामवच्छेदकत्वे द्वैविध्यमनुपपत्तिः। वर्णितत्वप्रामाण्यग्रहाभावस्य पृथक्कारणतां स्वीकरिष्याम इति वाच्यं। अप्रा-
माण्यग्रहाभावस्य हेतुतामते तत्तद्विधपरामर्शयोः पृथक्कारणताकल्पनस्यावश्यकत्वात्। अथान्यैकविधा-
प्रामाण्यग्रहविशिष्टान्यविधपरामर्शकाले उभयविधाप्रामाण्यग्रहाभावधूमादिपरामर्शघटितसामग्र्याः सत्त्वा-
दनुमित्यनुपपत्तेः। धूमपरामर्शेण कारणतेन उभयविधाप्रामाण्यग्रहाभावयोरन्यतरस्य सहकारित्वोपगमे तु अ-
नुमित्युत्पादकप्रयोजिकापि अन्यविधाप्रामाण्यग्रहाभावव्याप्यविषयतानिरूपितपक्षविषयताशालित्वमिनिष्ठपक्षा १९

वच्छिन्नघटितसामग्र्याः पर्वतपरामर्शीयप्रामाण्ये कर्तत्वे विसत्वेनानुमित्यनुमित्यनुदयापत्तेरिति चेन्न। स्वीयधूमाभाववद्विशे-
ष्यतानिरूपितत्वप्रकारतानिरूपितविशेष्यतावच्छेदकीभूतधूमप्रकारतात्वत्वसंबंधेन धूमप्रकारकत्वघटिताप्रामाण्यग्रहस्या-
भावः परामर्शनिष्ठानुमितिजनकीभूतव्याप्यविषयतायां स्वीयपर्वताभाववद्विशेष्यतानिरूपितत्वप्रकारतानिरूपितविशेष्य-
तावच्छेदकीभूतपर्वतप्रकारतात्वत्वसंबंधेन पर्वतप्रकारताघटिताप्रामाण्यग्रहस्याभावः तथापि व्याप्यपक्षविषयतायां निवे-
श्यः। एवं च धूमत्वप्रकारकत्वघटिताप्रामाण्यग्रहदशायां न व्याप्यविशेष्यकपरामर्शादनुमित्यनुमित्यनुदयापत्तिः। तादृशपरा-
मर्शीयव्याप्यविषयतायाः प्रकारतात्वाभावेनोपदर्शितसंबंधावच्छिन्नप्रतियोगिताकतादृशाप्रामाण्यग्रहाभावस्यास-
त्वात्। न वा पर्वतप्रकारकत्वघटिताप्रामाण्यग्रहदशायां पक्षविशेष्यकपरामर्शादनुमित्यनुदयप्रसंगः। तादृशपरामर्शी-
यपक्षविषयतायाः प्रकारतात्वाभावेनोपदर्शितसंबंधावच्छिन्नप्रतियोगिताकतदप्रामाण्यग्रहाभावस्याक्षतत्वात्। तथैव
पुरुषांतरव्याप्यप्रकारकत्वादिघटिताप्रामाण्यग्रहदशायां परामर्शीयतरविशेष्यकतादृशाप्रामाण्यग्रहदशायां च व्याप्यादि-
प्रकारकपरामर्शादनुमित्यनुदयप्रसंगः। प्रकृतपरामर्शीयतयापि व्याप्रामाण्यग्रहस्योपदर्शितसंबंधेन सत्त्वादिति चे-
त्। स्वसमानाधिकरणस्वनिरूपितविशेष्यताशालिज्ञाननिरूपितत्वविशिष्टतादृशप्रकारतात्वत्वसंबंधेनैवाप्रामा-
ण्यग्रहाभावनिवेशात्। स्वव्यधिकरणस्वनिरूपितविशेष्यकाप्रामाण्यग्रहस्य च स्वीयप्रकारतायां तादृशसंबंधेनाभावस्या-
क्षतत्वादिति। न च तादृशाप्रामाण्यग्रहसमानाधिकरणतद्विशेष्यकीभूतपरामर्शविषयतातः प्रकृतविषयतानामभिन्न-
तयास्वसमानाधिकरणस्वविशेष्यकज्ञाननिरूपितत्वावच्छिन्नव्याप्यादिप्रकारतात्वत्वसंबंधेन प्रकृतपरामर्शीयव्या-
प्यादिप्रकारतायामपि तादृशाप्रामाण्यग्रहस्य सत्त्वात् कथमिति वाच्यं। ज्ञानभेदेन विषयताभेदोपगमात्। ज्ञानभेदेन तन्ना-

ति व्याप्यपक्षोभयनिरूपितत्वानुरोधेन वक्ष्यमाणकारणत्वमवश्यं वक्तव्यं। अन्यथा हि विषयनिष्ठपक्षस्वरूपकत्वनिवेशे व्याप्यसंशयसत्त्वे व्याप्यवि
शेष्यकपरामर्शात् पक्षप्रकारकसंशयात् पक्षविशेष्यकपरामर्शाद्वानुमित्यनुदयप्रसंग इति वाच्यं। स्वावच्छिन्नविषयतावच्छिन्नविष
यताकत्व स्वावच्छिन्नप्रतियोगिताकाभावप्रकारतानिरूपितविशेष्यतानिरूपितत्वोभयसंबंधेन किंचित्पदार्थविशिष्टभिन्नो
यो व्याप्यपक्षोभयविषयतानिरूपितविषयतात्वच्छालितादृशपरामर्शत्वेन हेतुत्वे तथाचोभयविषयनिरूपितत्वैकरूपेण निवेशानां
काप्यनुपपत्तिरिति कृतं पल्लवितेन। यदि च धूमाभाववति धूमप्रकारकभ्रमत्वप्रामाण्यग्रहदशायां पर्वतो धूमरूपमित्याका
रकात् तद्वह्निव्याप्यपर्वतो धूमवानित्येवं तदाकारकात् पक्षविशेषणकपरामर्शादनुमित्यनुपपत्तिः प्रामाण्यं निश्चितं तदा व्याप्यादिविषय
त्वांशे विशेषणीभूतपक्षादिविषयतानिरूपकत्वस्य वा तादृशव्याप्यादिप्रकारतात्वावच्छिन्नत्वस्य संबंधेन व्याप्यादिप्रकारकत्वप
३० दितोऽप्रामाण्यग्रहाभावो निवेशनीयः। तादृशपरामर्शीयपक्षप्रकारतानिरूपितधूमादिविषयतायां प्रकारतात्वसत्त्वेपि तस्यानप्र
कारतात्वेन पक्षविषयतानिरूपकत्वं अपि तु विशेष्यतात्वेनैवेति। तन्निष्ठप्रकारत्वावच्छिन्नपक्षविषयतानिरूपकत्वे तादृश
व्याप्यप्रकारतासंबंधेन तादृशाप्रामाण्यग्रहस्याभावः सुलभ एव। वस्तुतस्तु पक्षमुख्यविशेष्यकव्याप्यमुख्यविशेष्यकप
रामर्शयोरेवानुमितिजनकत्वं। नत्वन्यस्य प्रमाणाभावात् इति तत्त्वं। अथ व्याप्यविषयतानिरूपितपक्षविषयताशालि
निश्चयत्वेनानुमितिहेतुत्वे वह्निव्याप्यपर्वतः वह्निव्याप्यः पर्वतवानित्याकारकव्याप्यनिरूपिताधेयत्वपक्षनि
रूपिताधिकरणत्वावगाहिपरामर्शादनुमित्यापत्तिः तयोरपि व्याप्यविषयतानिरूपितपक्षविषयताशालित्वादिति चे
न्नैवं। व्याप्यपक्षयोः किंचित्संबंधावगाहिज्ञानादनुमितिवारणाय हेतुतावच्छेदकसंबंधविषयतानिवेशनमावश्य
कं। एवं च विषयितानिरूपितायाः संयोगनिष्ठसांसर्गिकविषयतातन्निरूपितपक्षविषयताशालिनिश्चयत्वे ३०

मेव हेतुत्वं वाच्यं। व्याप्यपर्वतः व्यापकः पर्वतवान्वह्न्याकारकोपदर्शितपरामर्शो योऽस्य संयोगावच्छिन्नाधेयत्वसंयोगावच्छिन्नाधि
करणत्वयोः संसर्गतया व्याप्यविषयतानिरूपिताधेयत्वाधिकरणत्वीयसांसर्गिकविषयितानिरूपितपक्षविषयताशालित्वमे
वन तु व्याप्यविषयतानिरूपिताधेयत्वाधिकरणत्वीयसांसर्गिकविषयितानिरूपितपक्षविषयताशालित्वमेतेनातिप्रसंगः।
अथैवं पर्वते वह्निव्याप्यवह्न्याकारकज्ञानस्यापि संयोगावच्छिन्नाधेयत्वादिसंसर्गतया न व्याप्तिविषयतानिरूपितसंयोग
सांसर्गिकविषयितानिरूपितपक्षविषयताशालित्वमिति चेन्न तत्र का क्षतिः। न हि संयोगावच्छिन्नाधेयतासंसर्गकपक्ष
विशेषणकपरामर्शसंबन्धावच्छिन्नाधिकरणतासंसर्गकव्याप्यविशेषणकपरामर्शयोरनुगमो विधीयते। किन्तु संयोग
संसर्गकव्याप्यपक्षोभयविषयताशालिपरामर्शयोः। एतयोरेवोपदर्शितकारणतावच्छेदकाक्रान्तत्वमस्त्येव। न चैवमपि संयोगावच्छिन्नाधे
यतासंबन्धेन पक्षविशेषणकपरामर्शस्य स्वातन्त्र्येण हेतुत्वमावश्यकमिति वाच्यं। तादृशपरामर्शस्यानुमितिहेतुतायाऽनभ्युपगमाते
न च संयोगसंबन्धेन पक्षविशेषणकपरामर्शस्य तादृशपरामर्शस्य वाऽनुमितिकारणत्वमित्यत्र विनिगमनाविरहादिति वाच्यं
संयोगावच्छिन्नाधेयतानिष्ठसांसर्गिकविषयतानिरूपकतादृशपरामर्शस्य हेतुतामपेक्ष्य संयोगादिसांसर्गिकविषयतानिवे
शपरामर्शत्वापेक्षया संयोगादिसंसर्गावच्छिन्नाधेयतासंसर्गकपरामर्शत्वस्य गुरुत्वेऽपि संयोगावच्छिन्नाधिकरणतासं
सर्गकव्याप्यविशेषणकपरामर्शत्वापेक्षया अतथात्वात्। संयोगावच्छिन्नाधिकरणतासंसर्गकव्याप्यविशेषणकपराम
स्य संयोगावच्छिन्नाधेयतासंसर्गकपक्षविशेषणकपरामर्शस्य वा कल्प्यते तत्र विनिगमकदानस्याशक्यत्वात्। तादृशप
क्षविशेषणकपरामर्शस्य हेतुतासिद्धिनिर्वाहे हेतुत्वेति वाच्यं। यत्र संयोगो हेतुतावच्छेदकसंबन्धस्तत्र संयोगावच्छिन्नाधि पदि
करणतासंसर्गकव्याप्यविशेषणकतानं हेतुत्वे एव तत्र भवति तदेवं पक्षांशे व्याप्यीय हेतुतावच्छेदकसंबन्धानवगा

तित्वात् परं तु पत्रसंयोगावच्छिन्नाधिकरणतैव हेतुतावच्छेदकसंबंधस्तत्रैव तादृशपरामर्शस्य हेतुत्वात् तत्र च संयोगावच्छिन्नाधे
यतासंबंधेन वह्निविशेषणकज्ञानस्य हेतुत्वं न संभवति संयोगावच्छिन्नाधिकरणताख्यव्याप्यतावच्छेदकसंबंधावगाहि
त्वात्। अप्राप्य विषयतानिरूपितसंयोगसंबंधभिन्नसांसर्गिकविषयतानिरूपितपक्षविषयताशालिनिश्चयत्वेनानुमि
तिहेतुत्वे पत्रसंयोगावच्छिन्नाधिकरणतामादायैव हेतुतावच्छेदकसंबंधस्तत्र तादृशसंबंधेन व्याप्यांशे पक्षविशेषणक
ज्ञानादनुमित्यापत्तिः। एवं पत्रसमवायादिसंबंधे न हेतुतावत्र समवायादिना व्याप्यांशे पक्षविशेषणकपरामर्शा
दनुमित्यापत्तिः। न चेष्टापत्तिः तथा सति साध्याभाववद्वृत्तिहेतुव्यतिरेकेऽपि साध्यानुमानापत्तिः। तादृशव्याप्यमिदं प्रकारतानिरूपि
3 ताधिकरणत्वसमवायादिसांसर्गिकव्याप्यविशेष्यकज्ञानस्य प्रमात्वे न विशेषदर्शिनामपि तत्संभवतीति चेन्न। अधिकरण
तासमवायसंबंधावच्छिन्नहेतुताश्रयत्वे पक्षविशेषणकस्यापि ज्ञानस्यानुमितिहेतुत्वात् तत्रानुगमस्य निर्व्यक्तत्वात्। व्याप्य
प्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वेनैव हेतुत्वोपगमेनातिप्रसंगविरहात्। उक्तानुगतरूपेण हेतुतानुपत्रसं
योगस्तादात्म्यं वा हेतुतावच्छेदकसंबंधस्तत्रैवेति ध्येयं। अथ पत्रसंयोगो हेतुतावच्छेदकसंबंधस्तत्रापि पक्षविशेषण
कपरामर्शस्य हेतुत्वमनुभवविरुद्धं तथातिप्रसंगे च तन्नियामकसंयोगसंबंधेन हेतुवह्नौ पदार्थे साध्यानुमानाप
त्तेरिति चेन्न। पत्रसंयोगो हेतुतावच्छेदकसंबंधस्तत्र यदि हेतुसंबंधिनः साध्याभावस्यान्तरा व्यभिचारेणाव्या
प्तेरेव नास्ति। अत संयोगित्रिकपं साध्यानुमानं प्रसंजयसि न च साध्याभाववति हेतोः सत्वेऽपि तत्र संयोगेन तस्या वृ
त्तेर्न व्यभिचारः। साध्याभाववद्वृत्तित्वस्यैव व्यभिचारपदार्थत्वादिति वाच्यं। तादात्म्यादिवृत्तिनियामकसंबंधेन
व्यभिचारिसाध्याधारणाय संबंधित्वमात्रस्य व्यभिचारनिवेशनीयत्वात्। अथ मा भूद्व्याप्तिस्तथापि तत्कृतः संभवती २९

नेति चेन्न। यत्र भ्रमस्तत्रानुमितिरपि भ्रमात्मिकैव। अत एव सल्लिङ्गपरामर्शादिनानुमितावनुभवविरोधोपि। यत्तु पक्षविशे
षणकपरामर्शात्पक्षविशेषणकैवानुमितिरुत्पद्यते। जनकज्ञाने तु यत्सर्जनितया भातस्य कालीभूतज्ञानेप्युपसर्जनतयैव भानादि
कार्यवैचित्र्यात्। व्याप्यवत्त्वविशेष्यक [illegible] कपरामर्शोपि विशिष्य हेतुताकल्पनमावश्यकमिति तन्न। तादृशनि
यमाभावात्। अन्यत्रापि पक्षविशेष्यकानुमितेर्वोपगमात्। भावसाध्यकस्थले साध्याभावस्य तेर्नियमतः। सत्त्वेन प्रति
बन्धकसत्त्वात् साध्यविशेष्यकानुमितेरसादासंभवाच्च। न च भावसाध्यकस्थले साध्यविशेष्यकानुमितेरसिद्धेः
प्रतिबन्धकाप्रसिध्या प्रतिबध्यप्रतिबन्धकभावकल्पनमेव न संभवतीति वाच्यं। विधेयमिश्रप्रत्ययस्यापि विधेयता
वच्छेदकनिवेशात्यासत्त्वाच्च शुद्धानुमितित्वेनानन्तानामेव प्रतिबध्यप्रतिबन्धकभावकल्पनात्। एवं विलक्षणानुमि
तिस्वीकारे परामर्शहेतुताबुद्धेः अनुमित्यादिसामग्र्याः प्रतिबन्धकतावच्छेदकविलक्षणानुमितिस्वीकार एवोचितेति
प्राहुः। अत्रेदं चिन्तनीयं। व्याप्यविशेष्यकपक्षविशेष्यकपरामर्शयोरनुगतरूपेण हेतुताकल्पने पक्षविशेष्यकपरामर्शसत्त्वे
काले सिद्धिसत्त्वे व्याप्यविशेष्यकपरामर्शेनानुमिमीयामीत्याकारकेच्छाकालेऽनुमित्यापत्तिः। व्याप्यविशेष्यकपरामर्शकाले
ऽनुमिनुयामित्यादिकायास्तादृशपरामर्शजन्यत्वप्रकारकानुमित्साविरहे सिध्यभावकूटघटितसामग्र्यास्तत्राप्यक्षतत्वात्
एवं व्याप्यविशेष्यकपरामर्शकाले सिद्धिसत्त्वे पक्षविशेष्यक [illegible] परामर्शेनानुमिमीयामीत्याकारकेच्छाकालादनुमित्या
पत्तिरिति विशिष्यैव तादृशपरामर्शयोर्हेतुत्वं युक्तमिति समासः॥ ॥इति श्रीहरिरामतर्कवागीशमहाचार्यविरचितो
नुमितिपरामर्शहेतुताविचारः समाप्तः॥ ॥श्रीसिद्धेश्वर्यै नमः॥ ॥संवत् १९५५ मार्गशीर्षशुक्ल द्वितीयातिथ
दिलिखितमदं सदाशिवेन॥ ॥श्रीगुरुभ्यो नमः॥ ॥शुभमस्तु॥ ॥ छ ॥ ॥ श्रीः॥ ॥ छ ॥ छ ॥ ३२

॥श्री [redacted] ॥ [redacted] ॥

॥श्रीसरस्वत्यैनमः॥

37

अनुमती पत्रास्य देनु नाविकार

१३३५

32